# संस्कृत
# Sanskrit

## कक्षा / Class IX
2025-26

### विद्यार्थी सहायक सामग्री
### Student Support Material




केन्द्रीय विद्यालय संगठन~Kendriya Vidyalaya Sangathan

# संदेश

विद्यालयी शिक्षा में शैक्षिक उत्कृष्टता प्राप्त करना एवं नवाचार द्वारा उच्च – नवीन मानक स्थापित करना केन्द्रीय विद्यालय संगठन की नियमित कार्यप्रणाली का अविभाज्य अंग है। राष्ट्रीय शिक्षा नीति 2020 एवं पी. एम. श्री विद्यालयों के निर्देशों का पालन करते हुए गतिविधि आधारित पठन-पाठन, अनुभवजन्य शिक्षण एवं कौशल विकास को समाहित कर, अपने विद्यालयों को हमने ज्ञान एवं खोज की अद्‌भुत प्रयोगशाला बना दिया है। माध्यमिक स्तर तक पहुँच कर हमारे विद्यार्थी सैद्धांतिक समझ के साथ-साथ, रचनात्मक – विशेषणात्मक एवं आलोचनात्मक चिंतन भी विकसित कर लेते हैं। यही कारण है कि वह बोर्ड कक्षाओं के दौरान विभिन्न प्रकार के मूल्यांकनों के लिए सहजता से तैयार रहते हैं। उनकी इस यात्रा में हमारा सतत योगदान एवं सहयोग आवश्यक है - केन्द्रीय विद्यालय संगठन के पांचों आंचलिक शिक्षा एवं प्रशिक्षण संस्थान द्वारा संकलित यह विद्यार्थी सहायक- सामग्री इसी दिशा में एक आवश्यक कदम है । यह सहायक सामाग्री कक्षा 9 से 12 के विद्यार्थियों के लिए सभी महत्वपूर्ण विषयों पर तैयार की गयी है। केन्द्रीय विद्यालय संगठन की विद्यार्थी सहायक- सामग्री अपनी गुणवत्ता एवं परीक्षा संबंधी - सामग्री संकलन की विशेषज्ञता के लिए जानी जाती है और शिक्षा से जुड़े विभिन्न मंचों पर इसकी सराहना होती रही है। मुझे विश्वास है कि यह सहायक सामग्री विद्यार्थियों की सहयोगी बनकर निरंतर मार्गदर्शन करते हुए उन्हें सफलता के लक्ष्य तक पहुँचाएगी।

शुभाकांक्षा सहित ।

**निधि पांडे**
**आयुक्त , केन्द्रीय विद्यालय संगठन**

**PATRON**

Smt. Nidhi Pandey, Commissioner, KVS

**CO-PATRON**

Dr. P. Devakumar, Additional Commissioner (Acad.), KVS (HQ)

**CO-ORDINATOR**

Ms. Chandana Mandal, Joint Commissioner (Training), KVS (HQ)

**COVER DESIGN**

KVS Publication Section

**EDITORS:**

1. Mr. B L Morodia, Director, ZIET Gwalior
2. Ms. Menaxi Jain, Director, ZIET Mysuru
3. Ms. Shaheeda Parveen, Director, ZIET Mumbai
4. Ms. Preeti Saxena, In-charge Director, ZIET Chandigarh
5. Mr. Birbal Dhinwa, In-charge Director, ZIET Bhubaneswar

**CONTENT CREATORS:**

1. Mr. Devendra Kumar Olawat, Principal, KV No. 01, Halwara
2. Mr Nand Kishore Sharma, TGT (Sanskrit), KV No. 4, Bhatinda
3. Mr. Rohitashav Kumar Meena, TGT (Sanskrit), KV Sector 31, Chandigarh
4. Mrs. Poonam Yadav, TGT (Sanskrit), KV Zirakpur
5. Mrs Taruna Sharma, TGT (Sanskrit), KV Gajj Bhunga
6. Mrs Reena Kumari, TGT (Sanskrit), KV Dappar
7. Mrs Lalita, TGT (Sanskrit), KV N0 3 Jalandhar
8. Mr Pinakpani Kherwal, KV No. 1 Patiyala

# विषयानुक्रमणिका


| क्र. सं. | विषयवस्तु का नाम | पृष्ठ संख्या |
|---|---|---|
| 1 | अपठित-अवबोधनम् | 4-14 |
| | रचनात्मकं कार्यम् | |
| 2 | पत्रलेखनम् चित्रवर्णनम् अनुच्छेदलेखनम् च | 15-19 |
| 3 | उत्तरसंकेत: पत्रलेखनम् चित्रवर्णनम् च, अनुच्छेदलेखनम् च | 19-21 |
| 4 | संवादलेखनम् /संवादपूर्ति: | 22-26 |
| 5 | उत्तरसंकेत: संवादपूर्ति: | 27-30 |
| 6 | कथापूर्ति: | 31-35 |
| 7 | उत्तरसंकेत: कथापूर्ति: | 35-38 |
| | अनुप्रयुक्त-व्याकरणम् | |
| 8 | उच्चारणस्थानानि | 39-40 |
| 9 | सन्धिकार्यम् | 41- 44 |
| 10 | कारक-उपपदविभक्तय: | 45-48 |
| 11 | शब्दरूपाणि | 49-54 |
| 12 | धातुरूपाणि | 55-61 |
| 13 | प्रत्यया: | 62-63 |
| 14 | अव्ययानि | 63-64 |
| 15 | संख्या: | 64-65 |
| 16 | उत्तरसंकेत: अनुप्रयुक्त-व्याकरणम् | 66-67 |
| | पठितावबोधनम् | |
| 17 | गद्यांशा:<br>उत्तरसंकेत: गद्यांशा: | 68-70<br>71-71 |
| 18 | पद्यांशा:<br>उत्तरसंकेत: पद्यांशा: | 72-75<br>75-76 |
| 19 | नाट्यांशा:<br>उत्तरसंकेत: नाट्यांशा: | 77-79<br>79-80 |
| 20 | प्रश्ननिर्माणम्<br>उत्तरसंकेत: प्रश्ननिर्माणम् | 81-82<br>82-82 |
| 21 | अन्वय: / उत्तरसंकेत: अन्वय:<br>भावार्थ: / उत्तरसंकेत: भावार्थ: | 83-87 |
| 22 | प्रसंगानुसारम् अर्थचयनम्<br>उत्तरसंकेत: प्रसंगानुसारम् अर्थचयनम् | 88-90<br>90-90 |
| 23 | पाठाधारित- कथापूर्ति:<br>उत्तरसंकेत: पाठाधारित- कथापूर्ति: | 91-91<br>92-92 |
| 24 | प्रतिदर्श-प्रश्न-पत्रम् | 93-101 |
| 25 | आदर्श-प्रश्न-पत्राणि-1,2<br>उत्तराणि - आदर्श-प्रश्न-पत्राणि-1,2 | 102-118<br>118-123 |

# अपठित-अवबोधनम् ( 10 )

**ध्यातव्या: बिन्दव:-**

अपठितावबोधने 80-100 शब्दपरिमित: एक: अपठित: गद्यांश: दीयते। तं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि। परीक्षाया: प्रश्नप्रकारा: अधो दीयन्ते।

**I) एकपदेन उत्तरत।** (प्रश्नस्य उत्तरं गद्यांशात् चित्वा एकपदेन लेखनीयम्।)

**II) पूर्णवाक्येन उत्तरत।** (प्रश्नस्य उत्तरं गद्यांशात् चित्वा पूर्णवाक्येन लेखनीयम्।)

**III) गद्यांशस्य उचितं शीर्षकं लिखत।** (गद्यांशस्य प्रतिपाद्यविषयम् अनुसृत्य शीर्षकं (Title) लेखनीयम्।)

**IV) अनुच्छेदाधारितं भाषिककार्यम्।**

क) वाक्ये कर्तृ-क्रियापदचयनम्।

ख) विशेषण-विशेष्य-पदचयनम्।

ग) पर्याय-विलोम-पदचयनम्।

**एकपदेन पूर्णवाक्येन च शुद्धोत्तर लेखनाय ध्यातव्या: विषया: -**

1. प्रश्नवाचकपदं किम् इति प्रथमं चिन्तयन्तु।
2. प्रश्नस्य अन्यपदानि अनुच्छेदस्य कस्मिन् वाक्ये सन्ति इति अवगच्छन्तु। तस्मिन् वाक्ये प्रश्नवाचकपदस्य लिङ्ग-विभक्ति-वचनानुसारं यत् पदम् अस्ति तदेव उत्तरं भवति।
3. प्रश्नवाचकपदानाम् आधारेण प्रश्नानाम् उत्तराणि लिङ्ग-विभक्ति-वचनानुसारं लिखन्तु।

**शीर्षकलेखनम् -**

1. शीर्षके एकपदं वा पदद्वयं वा पदत्रयं एव भवतु।
2. शीर्षके अनुच्छेदस्य विषयाधारितं - **प्रथमाविभक्तिपदं / षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदं** वा लिखत। यथा-

   **प्रथमाविभक्ति: पदम्** - वृक्ष:, भारतम्।

   **षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदं** - पर्यावरणस्य रक्षा, संस्कृतस्य महत्त्वम्,भारतस्य संस्कृति:।

**भाषिककार्यम् (यथानिर्देशम् उत्तरत ) -**

अस्मिन् वाक्ये कर्तृपदं किम् / क्रियापदं किम् ?

अस्मिन् वाक्ये / अनयो: पदयो: विशेषणपदं किम् /विशेष्यपदं किम् ?

अस्मिन् अनुच्छेदे ...... इति पदस्य समानार्थकपदं किम् / विलोमपदं किम् ? इत्येवं विधा: प्रश्ना: एव भवन्ति अत्र।

# अपठितावबोधनम्

**( 1 )**

**1.अधोलिखितम् अनुच्छेदम् पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

आचार: प्रथम: धर्मः। सदाचारेणैव जना: शान्तिं समृद्धिं च लभन्ते। ये नरा: अस्मिन् संसारे आत्महितम् इच्छन्ति ते सदैव सदाचरणम् एव कुर्यु:। अनेन आचरणेन एव सकलान् जनान् वशीभूतान् कर्तुं मानवा: समर्था: भवन्ति। अस्य सदाचारस्य तु मानवजीवने महती आवश्यकता वर्तते। सदाचारेण तु कोऽपि नर: महामानव: भवितुं शक्नोति। विद्वद्भि: तु शीलं परं भूषणम् इति कथ्यते। शीलेन एव कुलं शोभते। शीलम् एव अस्माकं बहुमूल्यं धनम् अस्ति।

**I. एकपदेन उत्तरत-** **1x2=2**

(क) प्रथम: धर्म: क: ?

(ख) शीलं परं भूषणम् इति कै: कथ्यते ?

(ग) नरा: अस्मिन् संसारे किम् इच्छन्ति ?

**II. पूर्णवाक्येन उत्तरत-** **2x2=4**

(क) अस्माकं बहुमूल्यं धनम् किम् अस्ति ?

(ख) केन नर: महामानव: भवितुं शक्नोति?

(ग) कस्य तु मानवजीवने महती आवश्यकता वर्तते?

**III. निर्देशानुसारम् उत्तरत-** **1x3=3**

(1). 'आवश्यकता' इति पदस्य अत्र विशेषणपदं किम्?

(अ) ईदृशी (ब) महती (स) शक्ति: (द) समृद्धि:

(2). अनुच्छेदे 'वित्तम्' इति पदस्य पर्यायपदं किम्?

(अ) भूषणम् (ब) शीलम् (स) धनम् (द) बहुमूल्यम्

(3) 'शीलेन एव कुलं शोभते'- अस्मिन् वाक्ये क्रियापदं किम्?

(अ) शीलेन (ब) एव (स) शोभते (द) कुलं

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत |** **1x1=1**

**( 2 )**

अनुशासनपालनेनैव मानवः जीवने साफल्यमधिगच्छतिI बाल्ये यौवने प्रौढत्वे वार्धक्ये चापि अनुशासनस्य आवश्यक्ता भवति| एवं हि गृहे विद्यालये सार्वजनिक संस्थासु शासने सेनायां वा अनेन विना कार्यं न चलति| यदि छात्राः विद्यालये अनुशासनस्य पालनं न कुर्वन्ति तदा तत्र अव्यवस्था भवति | अद्यत्वे विद्यालयेषु महाविद्यालयेषु च सर्वत्र अनुशासनस्य अभावः दृश्यते, येन ताः संस्थाः उपद्रवाणां कलहानां च केन्द्राणि जाताः | यदि शासने अनुशासनं न भवति तर्हि सर्वमपि राष्ट्र-विश्रृंखलतां गच्छति| अतः आत्मनः देशस्य समाजस्य च उन्नत्यै अनुशासनं नितराम् आवश्यकम् |

**I. एकपदेन उत्तरत -** **1x2=2**

(क) नरः जीवने केन साफल्यमधिगच्छति?

(ख) यदि छात्राः अनुशासनम् न पालयन्ति तदा किम् भवति ?

(ग) विद्यालयेषु महाविद्यालयेषु च सर्वत्र कस्य अभावः दृश्यते?

**II. पूर्णवाक्येन उत्तरत -** **2x2=4**

(क) अनुशासनस्य आवश्यकता कदा भवति?

(ख) अनुशासनस्य अभावे शासने किम् भवति ?

(ग) कस्य उन्नत्यै अनुशासनं नितराम् आवश्यकम् ?

**III. भाषिककार्यम् -** **1x3=3**

(1) 'अनुशासनपालनेनैव मानवः जीवने साफल्यमधिगच्छति' अस्मिन् वाक्ये क्रियापदं किं ?

(अ) मानवः (ब) जीवने (स) अधिगच्छति (द) शीलम्

(2) 'ताः संस्थाः' अनयोः पदयोः विशेषणपदं किम् ?

(अ) ताः (ब) संस्थाः (स) द्वयो: (द) कोऽपि न

(3) अनुच्छेदे 'आवासे' इति पदस्य पर्यायपदं किम्?

(अ) जीवने (ब) अनुशासने (स) विद्यालये (द) गृहे

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकस्य नाम लिखत 1** **1x1=1**

**( 3 )**

रामायणम् महाभारतम् च द्वे महाकाव्ये संस्कृत-साहित्यस्य भारतीय-संस्कृतेः च आधारस्तम्भौ स्त:। आदिकाव्यं रामायणम् ऋषेः वाल्मीकेः रचना अस्ति। इदम् काव्यम् सप्तकाण्डेषु वर्तते। ऋषिः वाल्मीकिः आदिकविः कथ्यते। महाभारतस्य रचयिता ऋषिः वेदव्यासः । महाभारतं नाम महाकाव्यम् -विश्व-कोषः इति कथ्यते। 'यत् इह अस्ति, न तत् अन्यत्र' इति मन्यते । अयं ग्रन्थः शतसहस्र-श्लोकेषु निबद्धः। विश्व-प्रसिद्ध श्रीमद्भगवद्गीता अस्य महाकाव्यस्य अंशः अस्ति। गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति-'कर्त्तव्य-भावेन स्वकर्त्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु'। एषः उपदेशः जनानां हितकरः।।

**I. एकपदेन उत्तरत-** **1x2=2**

(क) रामायणं कस्य रचना ?

(ख) ऋषि: वेदव्यासः कस्य रचयिता ?

(ग) आदिकवि: क: कथ्यते?

**II. पूर्णवाक्येन उत्तरत -** **2x2=4**

( क ) श्रीकृष्णः अर्जुनाय किम् उपदिशति ?

( ख ) विश्व-कोषः इति कं कथ्यते?

( ग ) विश्व-प्रसिद्ध श्रीमद्भगवद्गीता कस्य महाकाव्यस्य अंशः अस्ति?

**III. भाषिककार्य -** **1x =3**

(1) 'रामायणम् महाभारतम् च द्वे महाकाव्ये संस्कृत-साहित्यस्य'- अत्र विशेष्यपदं किम्?

(अ) महाभारतम् (ब) रामायणम् (स) महाकाव्ये (द) द्वे

(2)'गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति' अस्मिन् वाक्ये कर्तृपदं किम्?

(अ) गीतायाम् (ब) उपदिशति (स) अर्जुनाय (द) श्रीकृष्णः

(3) अनुच्छेदे 'लेखक:' इति पदस्य पर्यायपदं किम्?

(अ) उपदिशति (ब) रचयिता (स) महाभारतं (द) बहुमूल्यम्

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत |** **1x1=1**

**( 4 )**

जीवने समयः एव सर्वाधिकः मूल्यवान् अस्ति। व्यतीतस्य समयस्य एकम् अपि क्षणं केनापि प्रयत्नेन पुनः प्राप्तुं न शक्यते केनापि जनेन । अतः प्रत्येकं क्षणस्य सदुपयोगः सावधानेन मनसा करणीयः सर्वैः जनैः, विशेषतः विद्यार्थिभिः। यथा वयम् अर्जितस्य धनस्य एकैकस्य पणस्य व्ययं सम्यक् विचार्य कुर्मः तथैव एकैकस्य क्षणस्य अपि सदुपयोगः विवेकेन कुर्याम | एक: अपि क्षण: वृथा न यापनीयः । असावधानतया आलस्येन च निरर्थकं नीतः समयः पश्चात्तापस्य असफलतायाः च कारणं भवति । यः मानवः समयस्य महत्त्वम् अवगच्छति, तस्य सदुपयोगं च करोति सः एव सफलो भवति ।

**I. एकपदेन उत्तरत -** **1x2=2**

(क) मानवः कस्य सदुपयोगं कृत्वा सफल: भवति ?

(ख) सर्वाधिकः मूल्यवान् कः ?

(ग) प्रत्येकं क्षणस्य सदुपयोगः केन करणीयः?

**II. पूर्णवाक्येन उत्तरत-** **2x2=4**

(क) असफलतायाः कारणं किं भवति ?

(ख) कः सफलो भवति ?

(ग) कस्य एकम् अपि क्षणं केनापि प्रयत्नेन पुनः प्राप्तुं न शक्यते ?

**III. भाषिककार्यम्-** **3x1=3**

(1) 'कुर्मः' इति क्रियापदस्य कर्तृपदं किम्?

(अ) वयम् (ब) व्ययम् (स) सम्यक्

(2) 'सञ्चितस्य' इति पदस्य पर्यायः क: अस्ति ?

(अ) अर्जितस्य (ब) पणस्य (स) क्षणस्य

(3) 'उद्यमेन' इति पदस्य विलोमः क: अस्ति ?

(अ) विवेकेन (ब) सावधानेन (स) आलस्येन

**IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत ।** **1x1=1**

**( 5 )**

प्रकृतिः मनुष्यस्य उपकारिणी । मनुष्यैः सह प्रकृतेः शाश्वतः संबंध:। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति । पशवः , पक्षिणः, वनस्पतयः च प्रकृतेः अङ्गानि । असहायाः जनाः प्रकृतेः एव आश्रयं प्राप्नुवन्ति । प्रकृतिः स्वमनोहरेण सौन्दर्येण नीरसं हृदयम् अपि सरसं करोति । सूर्यः चन्द्रः च प्रकृतेः नेत्रे । सस्य-श्यामला एषा भूमिः । विविधाः औषधयः सुप्रकृतिः सकलानि खनिजानि च प्रकृतेः एव शोभा । सा तु नित्यम् एतैः साधनैः सर्वेषाम् उपकारं करोति। परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति, विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखम् वाञ्छति तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत् । अत एव अस्माभिः प्रकृतिः रक्षणीया। तेन च पर्यावरणं रक्षितं भविष्यति । "धर्मो रक्षति रक्षितः" इत्यार्षवचनम् । प्रकृतेः रक्षणमपि धर्म: एव भवति ।

**I. एकपदेन उत्तरत-** **1x2=2**

(क) प्रकृतिः कस्य उपकारिणी ?

(ख) चन्द्रः सूर्यश्च कस्याः नेत्रे स्तः ?

(ग) कै: सह प्रकृतेः शाश्वतः संबंध: ?

**II. पूर्णवाक्येन उत्तरत-** **2x2=4**

(क) प्रकृतिः कथं नीरसं हृदयं सरसं करोति ?

(ख) नरः शाश्वतसुखं वाञ्छति तर्हि किं न आचरेत्?

(ग) कानि प्रकृतेः एव शोभा?

**III. भाषिक कार्यम्-** **1x3=3**

(1) 'नीरसम् हृदयम्' अत्र विशेषणं किम् ?

(अ) नीरसम् (ब) हृदयम् (स) प्रकृतिः

(2) 'असहायाः जनाः प्रकृतेः एव आश्रयं प्राप्नुवन्ति'- इति वाक्ये क्रियापदं किम् ?

(अ) प्राप्नुवन्ति (ब) गच्छन्ति (स) आप्नुवन्ति

(3) 'धन्य:' इति पदस्य विलोमपदं परिच्छेदात् लिखत।

(अ) शाश्वतम् (ब) अधन्य: (स) जनः

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **1x1=1**

**( 6 )**

प्रदूषणस्य समस्या अस्माकं देशस्य प्रमुखा समस्या अस्ति। प्रदूषणस्य आधिक्येन जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति। प्रदूषणस्य निराकरणाय सर्वकारः बहुविधं प्रयासं करोति परन्तु प्रदूषणं तु अनवरतं वर्धते। यावत् जनाः जागरूकाः न भविष्यन्ति तावत् अस्याः समस्यायाः समाधानं न भविष्यति। अस्याः समस्यायाः समाधानार्थं वृक्षाः रोपणीयाः उद्योगानां विस्तारः च वैज्ञानिकरीत्या करणीयः।

**(i) एकपदेन उत्तरत-** **1x2=2**

(क) कस्य समस्या देशस्य प्रमुखा समस्या अस्ति ?

(ख) प्रदूषणस्य आधिक्येन जनाः कैः आक्रान्ताः भवन्ति ?

(ग) कस्य निराकरणाय सर्वकारः बहुविधं प्रयासं करोति?

**(ii) पूर्णवाक्येन उत्तरत-** **2x2=4**

(क) प्रदूषणस्य समस्यायाः समाधानार्थं किं किं करणीयम् ?

(ख) यावत् जनाः जागरूकाः न भविष्यन्ति तावत् किं न भविष्यति ?

(ग) कस्य आधिक्येन जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति?

**(iii) भाषिककार्यम्-** **3x1=3**

(1) 'जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति' अस्मिन् वाक्ये कर्तृपदं किम् ?

(अ) जनाः (ब) रोगैः (स) निरन्तरं (द) भवन्ति

(2) 'अनवरतम्' पदस्य पर्यायपदं किम् ?

(अ) समाधानम् (ब) बहुविधम् (स) निरन्तरं (द) प्रयासम्

(3) 'जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति' अस्मिन् वाक्ये 'रोगैः' पदस्य विशेषणपदं किम्?

(अ) जनाः (ब) विविधैः (स) अक्रान्ताः (द) निरन्तरम्

**(iv) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत -** **1x1=1**

## ( 7 )

भारते उत्सवा: द्विविधा: सन्ति- राष्ट्रीया: उत्सवा: अन्ये च पारम्परिका: उत्सवा:। 1947 तमे वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के अस्माकं देश: स्वतन्त्र: जात: । समग्रे देशे अयम् उत्सव: आयोज्यते । एवमेव 1950 तमे वर्षे जनवरीमासस्य षड्विंशति: तिथौ गणतन्त्रदिवस: समारोह: भवति । एतौ अस्माकं राष्ट्रीयौ उत्सवौ। पारम्परिक-उत्सवेषु एक: विशिष्ट: उत्सव: संस्कृतदिवस: अस्ति | अस्य आयोजनं श्रावणपूर्णिमायाम् भवति । एतत् दिनं भारतस्य केन्द्रशासनेन संस्कृतदिनत्वेन घोषितम् अस्ति। अत: समग्रे देशे संस्कृतज्ञा: संस्कृतोत्सवम् मानयन्ति। अस्मिन् दिने अस्माभि: संस्कृतकार्यक्रमेषु भाग: ग्रहीतव्य:। विदुषां मेलनं, संस्कृतनाटकानां मञ्चनम्, परिचर्चा, श्लोकोच्चारणम्, संवादा:, प्रदर्शनी, इत्यादय: बहव: कार्यक्रमा: आयोजयितुं शक्यन्ते। संस्कृतम् अस्माकं देशस्य गौरवम् इति अस्माभि: सर्वदा स्मरणीयम् । संस्कृतभाषायामेव अस्माकं संस्कृति: आश्रिता । अतएव उच्यते-भारतस्य प्रतिष्ठे द्वे- संस्कृतं संस्कृतिस्तथा ।

**I. एकपदेन उत्तरत -** **1×2=2**

(क) गणतन्त्रदिवस– समारोह: कदा समायोज्यते ?

(ख) संस्कृतदिवसस्य आयोजनं कदा भवति ?

(ग) कस्मिन् भाषायाम् अस्माकं संस्कृति: आश्रिता?

**II. पूर्णवाक्येन उत्तरत -** **2x2=4**

(क) अस्माकं गौरवम् किं अस्ति ?

(ख) अस्मिन् दिने के-के कार्यक्रमाः आयोजयितुं शक्यन्ते?

(ग) अस्माकं देश: कदा स्वतन्त्र: जात:?

**III. भाषिककार्यम् –** **1×3=3**

(1) 'सम्पूर्णे' इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

(अ) सर्वदा (ब) समग्रे (स) देशे (द) अस्ति

(2) 'मूर्खाणाम्' इत्यस्य किं विपर्ययपदम् अत्र प्रयुक्तम् ?

(अ) विदुषाम् (ब) ज्ञानीनाम् (स) छात्राणाम् (द) अध्येतृणाम्

(3) "गणतन्त्र - दिवसः समारोह: भवति"- इत्यत्र क्रियापदं किम् ?

(अ) दिवसः (ब) गणतन्त्रः (स) समारोहः (द) भवति

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **1x1=1**

## ( 8 )

एकदा शीतस्य भीषण: प्रकोप: अभवत्। सम्राट् चन्द्रगुप्त: निश्चितवान् यत् निर्धनेभ्य: कम्बलानां वितरणं भवेत् । प्रधानमन्त्री चाणक्य: तत्कार्यं स्वीकृतवान् । भृत्या: सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्त:। रात्रौ केचन चौरा: कम्बलान् चोरयितुम् तस्य कुटीरं प्राविशन् । ते अपश्यन् यत् चाणक्य: कम्बलम् विना एव सुप्त: । तस्मिन् एव क्षणे चाणक्य: पदध्वनिं श्रुत्वा प्रबुद्ध: । चौरा: तम् अपृच्छन् – "भवतां समीपे कम्बलानां राशि: अस्ति तथापि भवान् कम्बलम् विना एव स्वपिति ?" चाणक्य: तान् अवदत् –"श्रृणुत ! प्रावारका: केवलं निर्धनेभ्य: वितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौर: भविष्यामि |" तदा नतमस्तका: चौरा: तस्य पादयो: पतित्वा क्षमायाचनम् अकुर्वन् |

**I. एकपदेन उत्तरत –** **1x2=2**

(क) एकदा कस्य प्रकोप: अभवत् ?

(ख) क: कम्बलानां वितरणकार्यं स्वीकृतवान् ?

(ग) चाणक्य: काम् श्रुत्वा प्रबुद्ध:?

**II. पूर्णवाक्येन उत्तरत –** **2x2=4**

(क) चौरा: चाणक्यं किम् अपृच्छन् ?

(ख) चाणक्य: चौरान् किम् अवदत् ?

(ग) सम्राट् चन्द्रगुप्त: किं निश्चितवान् ?

**III. भाषिककार्यम्** **1X3=3**

1. "भविष्यामि" इति क्रियापदस्य कर्ता क: ?

(अ) चौरा: (ब) निर्धना: (स) अहम् (द) चाणक्य:

(2) "सेवका:" इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?

(अ) प्रावारका: (ब) भृत्या: (स) राशि: (द) शीतस्य

(3) "केचन" इति पदं केषां विशेषणम् ?

(अ) भृत्यानाम् (ब) प्रावारकाणाम् (स) चौराणाम् (द) निर्धनानाम्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **1x1=1**

**( 9 )**

परिश्रम: एव सर्वातिशायी सकलकामना-सिद्धिप्रद: उपाय: वर्तते। सफलताया: मन्त्र: परिश्रम: एव। यत्र परिश्रमिण: वसन्ति तत्र सर्वाणि कार्याणि सिध्यन्ति। कार्याणि च यत्र सिध्यन्ति, तत्र प्रसन्नताया: आनन्दस्यैव वातावरणं भवति। सर्वे जना: परस्परं स्नेहम् आदरम् च व्यवहरन्ति। पुनश्च परिश्रमिण: मानसिकरूपेण शारीरिकरूपेण च स्वस्था: नीरोगाश्च भूत्वा आयुष्मन्त: भवन्ति। एतत् विपरीतं आलस्यमेकमेव मनुष्यस्य बलीयान् शत्रु:। आलस्यकारणात् मनुष्य: न केवलं स्वकीयम् अहितं करोति अपितु सर्वेषाम् एव जनानां कृते कष्टकारक: भवति। अलसा: जना: स्वयमपि निष्फला: असफलाश्च भवन्ति, ते अन्यान् अपि हतोत्साहान् कृत्वा निरर्थका: इव सम्पादयन्ति। अतः आलस्यं विहाय परिश्रम: एव आचरणीय:।

**I. एकपदेन उत्तरत-** **1x2= 2**

(क) सफलतायाः मन्त्रः कः?

(ख) मनुष्यस्य बलीयान् शत्रुः?

(ग) यत्र परिश्रमिण: वसन्ति तत्र कानि सिध्यन्ति ?

**II. पूर्णवाक्येन उत्तरत-** **2x2=4**

(क) परिश्रमः कीदृशः उपायः वर्तते?

(ख) आलस्यकारणात् का का हानिः भवति?

(ग) के परस्परं स्नेहम् आदरम् च व्यवहरन्ति?

**III. यथानिर्देशम् उत्तरत-** **1x3=3**

(1) "यत्र परिश्रमिणः वसन्ति तत्र सर्वाणि कार्याणि सिध्यन्ति" अत्र विशेषणपदं किम्?

(अ) परिश्रमिणः (ब) सर्वाणि (स) कार्याणि (द) सिध्यन्ति

(2) “आलस्यमेकमेव मनुष्यस्य बलीयान् शत्रुः भवति” अत्र कर्तृपदं किम्?

(अ) आलस्यम् (ब) मनुष्यस्य (स) बलीयान् (स) भवति

(3) “रिपुः” इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(अ ) अलसः (ब) बलीयान् (स)असफ़लः (द) शत्रुः

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1x1=1**

**( 10 )**

भारत देशः महान् देशः अस्ति | अस्य विशाल-सीमा अस्ति | उत्तरस्यां पर्वतराज: हिमालयः अस्ति | हिमालयस्य शाखा: प्रशाखा: पूर्व-पश्चिम-दिशयो: प्रसृता: सन्ति | हिमालयः भारतं प्रहरी इव रक्षति | भारतस्य दक्षिण- दिशायां पूर्वदिशायां पश्चिमदिशायां च सिन्धुमहोदधि: वर्तते | अयं सागरः भारतमातु: पादौ प्रक्षालयति | सागरात् उत्थिता: मेघा: सम्पूर्णदेशे वर्षन्ति | ते महद् अन्नम् उत्पादयन्ति |

**I. एकपदेन उत्तरत- 1x2=2**

1. कः महान् देशः अस्ति?
2. कस्य सीमा विशाला अस्ति?
3. कस्मिन् दिशायां पर्वतराज: हिमालयः अस्ति?

**II. पूर्णवाक्येन उत्तरत- 2x2=4**

1. कः भारतं प्रहरी इव रक्षति?
2. सागरात् उत्थिता: मेघा: कुत्र वर्षन्ति?
3. हिमालयस्य शाखा: प्रशाखा: कस्मिन् दिशयो: प्रसृता: सन्ति?

**III. यथानिर्देशम् उत्तरत- 1x3=3**

(1) ‘जलधरा:’ इति पदस्य किम् पर्यायपदम् अस्ति?

(अ) मेघा: (ब) सागरः (स) हिमालयः (द) शाखा:

(2) ‘शाखा’ इति कर्तृपदस्य किम् क्रियापदम् अस्ति?

(अ) अस्ति (ब) सन्ति (स ) रक्षति (द) वर्षन्ति

(3) ‘ते महद् अन्नम् उत्पादयन्ति’अस्मिन् वाक्ये विशेषणपदम् किम् अस्ति?

(अ) ते (ब) अन्नं (स) उत्पादयन्ति (द) महद्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1x1=1**

# उत्तराणि

1. **अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. आचार:, 2. विद्वद्भि: 3. आत्महितं

**II. पूर्णवाक्येन उत्तरत-**

1. अस्माकं बहुमूल्यं धनं शीलम् अस्ति I
2. सदाचारेण नर: महामानव: भवितुं शक्नोति I
3. सदाचारस्य तु मानवजीवने महती आवश्यकता वर्तते।

**III. यथानिर्देशम् उत्तरत-**

1. (ब) महती, 2. (स) धनम् 3. (स) शोभते

**IV. समुचितं शीर्षकं-** भारतदेश: / भारतम् / भारतस्य महिमा **I**

**2. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. अनुशासनपालनेन, 2. अव्यवस्था, 3. अनुशासनस्य

**II. पूर्णवाक्येन उत्तरत-**

1. अनुशासनस्य आवश्यकता बाल्ये यौवने प्रौढ़त्वे वार्धक्ये च भवति I
2. अनुशासनस्य अभावे राष्ट्र-विश्रृंखलतां गच्छति I
3. आत्मनः देशस्य समाजस्य च उन्नत्यै अनुशासनं नितराम् आवश्यकम् |

**III. यथानिर्देशम् उत्तरत-**

1. (स) अधिगच्छति, 2. (अ) ता: 3. (द) गृहे

**IV. समुचितं शीर्षकं-** अनुशासनम् / अनुशासनस्य महत्त्वम् / अनुशासनस्य आवश्यकता **I**

**3. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. वाल्मीके:, 2. महाभारतस्य, 3. वाल्मीकि:

**II. पूर्णवाक्येन उत्तरत-**

1. श्रीकृष्ण: अर्जुनाय उपदिशति- ‘कर्त्तव्यभावेन स्वकर्त्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु’ I
2. महाभारतं नाम महाकाव्यम्-विश्वकोष: इति कथ्यते I
3. विश्व-प्रसिद्ध श्रीमद्भगवद्गीता महाभारतस्य महाकाव्यस्य अंशः अस्ति I

**III. यथानिर्देशम् उत्तरत-**

1. (स) महाकाव्ये, 2. (द) श्रीकृष्ण: 3. (ब) रचयिता

**IV. समुचितं शीर्षकं-** संस्कृत-साहित्यस्य आधारस्तम्भौ ग्रन्थौ / भारतस्य महाकाव्ये **I**

**4. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. समयस्य, 2. समय:, 3. सावधानेन मनसा

**II. पूर्णवाक्येन उत्तरत-**

1. असफलताया: कारणं असावधानतया आलस्येन च निरर्थकं नीत: समय: भवति I
2. य: मानव: समयस्य महत्त्वम् अवगच्छाति, तस्य सदुपयोगं च करोति स: एव सफल: भवति I
3. व्यतीतस्य समयस्य एकम् अपि क्षणं केनापि प्रयत्नेन पुनः प्राप्तुं न शक्यते I

**III. यथानिर्देशम् उत्तरत-**

1. (अ) वयम्, 2. (अ) अर्जितस्य 3. (स) आलस्येन

**IV. समुचितं शीर्षकं-** समयस्य सदुपयोग: / समयस्य महत्त्वम् **I**

**5. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. मनुष्यस्य, 2. प्रकृतेः 3. मनुष्यैः

**II. पूर्णवाक्येन उत्तरत-**

1. प्रकृति: स्वमनोहरेण सौन्दर्येण नीरसं हृदयं सरसं करोति I
2. नर: शाश्वतसुखं वाञ्छति तर्हि प्रकृते: प्रतिकूलं कदापि न आचरेत् I
3. विविधाः औषधयः सुप्रकृतिः सकलानि खनिजानि च प्रकृतेः एव शोभा I

**III. यथानिर्देशम् उत्तरत-**

1. (अ) नीरसम्, 2. (अ) प्राप्नुवन्ति 3. (ब) अधन्य:

**IV. समुचितं शीर्षकं-** प्रकृते: रक्षा / धर्मो रक्षति रक्षित: / प्रकृते: महिमा **I**

**6. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. प्रदूषणस्य, 2. विविधै: रोगै:, 3. प्रदूषणस्य

**II. पूर्णवाक्येन उत्तरत-**

1. प्रदूषणस्य समस्याया: समाधानार्थं वृक्षा: रोपणीया: उद्योगानां विस्तार: च वैज्ञानिकरीत्या करणीय: I
2. यावत् जना: जागरूका: न भविष्यन्ति तावत् प्रदूषण-समस्याया: समाधानं न भविष्यति I
3. प्रदूषणस्य आधिक्येन जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्तिI

**III. यथानिर्देशम् उत्तरत-**

1. (अ) जना:, 2. (स) निरन्तरम् 3. (ब) विविधै:

**IV. समुचितं शीर्षकं-** प्रदूषणस्य समस्या / वृक्षारोपणम् **I**

**7. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. जनवरीमासस्य षड्विंशतिः तिथौ , 2. श्रावणपूर्णिमायाम्, 3. संस्कृतभाषायां

**II. पूर्णवाक्येन उत्तरत-**

1. संस्कृतम् अस्माकं देशस्य गौरवम् अस्ति I
2. अस्मिन् दिने विदुषां मेलनं, संस्कृतनाटकानां मञ्चनम्, परिचर्या, श्लोकोच्चारणम्, संवादा:, प्रदर्शनी, इत्यादय: कार्यक्रमा: आयोजयितुं शक्यन्ते I
3. अस्माकं देश: 1947 तमे वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के स्वतन्त्र: जात:।

**III. यथानिर्देशम् उत्तरत-**

1. (ब) समग्रे, 2. (अ) विदुषाम् 3. (द) भवति

**IV. समुचितं शीर्षकं-** भारतस्य उत्सवा: / राष्ट्रीय: उत्सवा: / संस्कृतदिवस: **I**

**8. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. शीतस्य, 2. चाणक्य:, 3. पदध्वनिं

**II. पूर्णवाक्येन उत्तरत-**

1. चौरा: चाणक्यम् अपृच्छन्-"भवतां समीपे कम्बलानां राशि: अस्ति तथापि भवान् कम्बलं विना एव स्वपितिI"
2. चाणक्य: चौरान् अवदत्-"श्रृणुत ! प्रावारका: केवलं निर्धनेभ्य: वितरणार्थम् एव सन्तिI यदि अहम् एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौर: भविष्यामि I"
3. सम्राट् चन्द्रगुप्त: निश्चितवान् यत् निर्धनेभ्य: कम्बलानां वितरणं भवेत् ।

**III. यथानिर्देशम् उत्तरत-**

1. (स) अहम्, 2. (ब) भृत्या: 3. (स) चौराणाम्

**IV. समुचितं शीर्षकं-** चाणक्य: / चाणक्यस्य आत्मस्वाभिमानम् **I**

**9. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. परिश्रम:, 2. आलस्यम् 3. सर्वाणि कार्याणि

**II. पूर्णवाक्येन उत्तरत-**

1. परिश्रम: एव सर्वातिशायी सकलकामना-सिद्धिप्रद: उपाय: वर्तते I
2. आलस्यकारणात् मनुष्य: न केवलं स्वकीयम् करोति अपितु सर्वेषाम् एव जनानां कृते कष्टकारक: भवति I
3. सर्वे जना: परस्परं स्नेहम् आदरम् च व्यवहरन्ति।

**III. यथानिर्देशम् उत्तरत-**

1. (ब) सर्वाणि, 2. (अ) आलस्यम् 3. (द) शत्रु:

**IV. समुचितं शीर्षकं-** परिश्रमस्य महत्त्वम् / सफलाताया: उपाय: परिश्रम: **I**

**10. अपठितगद्यांश:-**

**I. एकपदेन उत्तरत-** 1. भारतदेश:, 2. भारतस्य , 3. उत्तरस्यां

**II. पूर्णवाक्येन उत्तरत-**

1. हिमालय: भारतं प्रहरी इव रक्षति I
2. सागरात् उत्थिता: मेघा: सम्पूर्णदेशे वर्षन्ति I
3. हिमालयस्य शाखा: प्रशाखा: पूर्व-पश्चिम-दिशयो: प्रसृता: सन्ति |

**III. यथानिर्देशम् उत्तरत-**

1. (अ) मेघा:, 2. (अ) अस्ति 3. (द) महद्

**IV. समुचितं शीर्षकं-** परिश्रमस्य महत्त्वम् / सफलाताया: उपाय: परिश्रम: **I**

# रचनात्मकलेखनम् ( 15 )

## पत्र -लेखनम् ( 5 )

**1. दिनत्रयस्य अवकाशप्राप्त्यर्थं प्रधानाचार्यं प्रति प्रार्थनापत्रम्-**

श्रीमन्त: (i).................... महोदय:

उच्च: माध्यमिक: (ii).............................|

विषय: अवकाश-प्राप्त्यर्थं (iii).......................|

महोदय:,

(iv)..........निवेदनम् अस्ति यत् अहम् (v)..........सम्मानिते विद्यालये नवमीकक्षाया: (vi)............ अस्मि| अहं ज्वरेण (vii) ...........अस्मि| कृपया सितम्बरमासस्य प्रथम(viii) ............ आरभ्य तृतीय-दिवसपर्यन्तं दिनत्रयस्य (ix) ..............प्रदाय अनुगृह्णातु माम्|

(x)..............

भवदीय:

आज्ञाकारी शिष्य:

**मञ्जूषा-**

| |
|---|
| सविनयं, पीडित:, विद्यालय:, छात्र:, दिवसात्, निवेदनम्, सधन्यवादम् अवकाशं, भवत्या:, प्रधानाचार्य: |

**2. शुल्कमुक्त्यर्थं स्वप्रधानाध्यापकाय लिखितं इदं प्रार्थनापत्रम् मञ्जूषायां प्रदत्तपदै: पूरयित्वा लिखत-**

श्रीमन्त: (i)__________ महोदय:

उच्च: माध्यमिक: (ii)________|

विषय: शुल्कमुक्त्यर्थं प्रार्थनापत्रम्|

महोदय:,

(iii)________________निवेदनमस्ति यदहं (iv)__________ विद्यालये दशम्यां कक्षायां (v)__ _________ | मम(vi) ________आर्थिक दशा समीचीना न अस्ति| निर्धनतायाः कारणात् मम पिता विद्यालयशुल्कप्रदानार्थं सक्षमो नास्ति, किन्तु मम अध्ययनस्य (vii)_ ________वर्तते| गतवर्षे अपि छात्रकल्याणकोषत: सहायतां प्राप्य मया अध्ययनं विहितम् | अत एव (viii)_______ वर्तते| यत् मम निर्धनतां स्व-अध्ययने च रुचिं (ix)_________शिक्षणशुल्कात् सर्वथा मुक्तिं प्रदास्यान्ति |

धन्यवादा:

भवदीय:

(x).......... शिष्य:

**मञ्जूषा-**

| |
|---|
| विलोक्य, भवतां, प्रार्थना, आज्ञाकारी, रुचि:, परिवारस्य, रमण: , प्रधानाचार्य:, सविनयं, पठामि, विद्यालय: |

**3.** **जितेन्द्रस्य अनुजः भूपेन्द्रः छात्रावासे निवसति। जितेन्द्रेण समयस्य सदुपयोगाय भूपेन्द्राय लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा लिखत।** **½×10=5**

विजयपुरतः

दिनाङ्कः ...........2023

प्रियः भूपेन्द्र !

(i) ...........

अत्र कुशलं तत्र (ii) ............। मानवजीवनाय प्रतिपलं (iii).............. अस्ति । विश्वे प्रकृतेः (iv).............कार्याणि नियमितसमये भवन्ति । उचितसमये यदि वृष्टिः न भवेत् तदा सर्वं क्षेत्रं (v)............। तथैव (vi) ...............यदि छात्रः न पठति तदा असौ समस्तजीवने पश्चात्तापं करोति। समयः तस्य एव जनस्य कार्येषु (vii)............ करोति यः समयस्य सदुपयोगं करोति। गते काले (viii)............ निरर्थकः। समयः कदापि कस्यचिदपि प्रतीक्षां न करोति। अतः सदा समयस्य (ix).............. करणीयः।

भवतः अग्रजः

(x)................

**मञ्जूषा**

| |
|---|
| सहभागितां, बाल्यकाले, जितेन्द्रः, अस्तु, शुभाशीषः, शोकः, शुष्येत् , सम्पूर्णानि, महत्त्वपूर्णम्, सदुपयोगः |

**4.** **भवान् कुलदीपकः अस्ति । 'पाञ्चजन्य' साप्ताहिके पत्रे भवान् पत्रकारः एवं समाचारं प्रकाशयितुम् इच्छति। अतः तस्य प्रकाशनार्थं पत्रस्य सम्पादकं प्रति मञ्जूषायाः सहायतया भवान् तत्पत्रं सम्पूर्य लिखतु -** ½ ×10=5

( **i** ) .............................

तिथिः :- ----------

( **ii** ) ........................... महोदय !

'पाञ्चजन्यः' समाचारपत्रम् ,

मुम्बईनगरम्

सादरं प्रणामम् ।

विषयः- ' पाञ्चजन्य ' साप्ताहिकपत्रे स्वमौलिकसमाचारं प्रकाशनार्थम् पत्रम् ।

महोदयः,

निवेदनम् अस्ति यत् अहं जनकपुरी क्षेत्रस्य निवासी एकः ( **iii** ) ............ अस्मि। मम पत्रकारिता, विवरणं समाचारं वा समये-समये देशस्य अनेकेषु (**iv**) ........... प्रकाश्यन्ते। सम्प्रति अहं केनचिन्माध्यमेन भवतां प्रतिष्ठितस्य साप्ताहिकपत्रस्य (**v**)................ श्रुतवान्। अतः स्वक्षेत्रस्य एकं अतीव- (**vi**)...........समाचारं तस्मिन् पत्रे (**vii** )............प्रेषयामि। कृपया इमं (**viii** ) ................. स्वप्रतिष्ठिते पत्रे प्रकाशयतु भवान्। भवताम् कृते अतीव ( **ix** ) ......................... भविष्यति ।

भवतां विश्वासुः

( **x** ) .........................


**मञ्जूषा**

| |
|---|
| **लाभप्रदः, महत्त्वपूर्णम्, मुम्बईतः, पत्रकारः, कुलदीपकः, विषये, समाचारम्, प्रकाशनार्थम्, सम्पादक!, पत्रेषु** |

# चित्र-वर्णनम् ( 5 )


**1. मञ्जूषाया: शब्दान्  नीत्वाचित्रस्य वर्णनम् पञ्चवाक्येषु लिखत-**

| |
|---|
| उपवनस्य, उपविशन्ति, भ्रमन्ति, सर्वत्र, वृक्षाः, पादपा: च, वाहनानि, जना:, सर्वे,  स्वास्थ्यलाभम्, प्राप्नुवन्ति |




**2. मञ्जूषाया: शब्दान्  नीत्वाचित्रस्य वर्णनम् पञ्चवाक्येषु लिखत-**

| |
|---|
| वृक्षाः, वदति , श्रृणोति , अधः , हस्ते ,वानरः , शाखायाम् , हस्तौ , खादति , उपतिष्ठति |



**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत-**



**मञ्जूषा**

| |
|---|
| **बालकः, पादकन्दुकेन, पुस्तकम्, पठति, द्वौ बालकौ, चित्रफलके, क्रीडतः, बालिका, निर्माणं, चित्रम्, यन्त्रेण, पश्यति।** |

**4. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत-**



**मञ्जूषा**

| |
|---|
| शाकविक्रेता, कोलाहलः, समूहः, आकारयन्ति, कदली, आलुकम्, पलाण्डु, गृञ्जनम्, प्रयच्छन्ति, विक्रीणन्ति |

# अनुच्छेदलेखनम् ( 5 )

**1. मञ्जूषायां प्रदत्तशब्दानां सहायतया 'वृक्षाणाम् महत्त्वम्' इति विषये अनुच्छेदं लिखत-**

| |
|---|
| **वृक्षाः, आधारं, फलानि, वायुः, पृथिवीं, प्रकृतेः, वृष्टिः, भविष्यन्ति, वृक्षारोपणं, रक्षामः** |

**2. . मञ्जूषायां प्रदत्तशब्दानां सहायतया 'विद्यायाः महत्त्वम्' इति विषये अनुच्छेदं लिखत-**

| |
|---|
| **विद्या, जीवनस्य, अन्धकारे, ददाति, सज्जनः, भवति, मोक्षदायिनी, यच्छति, कीर्तिं, धनं** |

**3. मञ्जूषायां प्रदत्तशब्दानां सहायतया 'सत्सङ्गतिः' इति विषये अनुच्छेदं लिखत-**

| |
|---|
| **सतां, सज्जनानां, पवित्रं, भवति, दुर्जनानां, गच्छति, लोककल्याणस्य, सत्संगतिः, सङ्गतिः, ऋषीणां** |

# उत्तरसंकेतः

## पत्र -लेखनम्

**1. उत्तराणि-**

(i) प्रधानाचार्यः (ii) विद्यालयः, (iii) निवेदनम् (iv) सविनयं, (v) भवत्याः
(vi) छात्रः (vii) पीडितः (viii) दिवसात्, (ix) अवकाशं (x) सधन्यवादम्

**2. उत्तराणि-**

i) प्रधानाचार्यः ii) विद्यालयः iii) सविनयं (iv) भवतां (v) पठामि,
(vi) परिवारस्य (vii) रुचिः (viii) प्रार्थना (ix) विलोक्य (x) आज्ञाकारी

**3. उत्तराणि-**

(i) शुभाशीषः, (ii) अस्तु, (iii) महत्त्वपूर्णम्, (iv) सम्पूर्णानि, (v) शुष्येत्
(vi) बाल्यकाले, (vii) सहभागितां, (viii) शोकः, (ix) सदुपयोगः (x) जितेन्द्रः

**4. उत्तराणि-**

**(i)** मुम्बईतः **( ii )** सम्पादक! **( iii )** पत्रकारः **(iv)** पत्रेषु **(v)** विषये
**(vi)** महत्त्वपूर्णम् **(vii )** प्रकाशनार्थम् **(viii )** समाचारम् **(ix)** लाभप्रदः **(x)** कुलदीपकः

# चित्र-वर्णनम्

**1. उत्तराणि-**

1. एतत् उपवनस्य चित्रम् अस्ति|
2. उपवनस्य द्वारे अनेकानि वाहनानि  तिष्ठन्ति|
3. उपवने अनेके जना: भ्रमन्ति|
4. भ्रमणेन स्वास्थ्यलाभं प्राप्नुवन्ति|
5. तत्र अनेके वृक्षाःसन्ति|

**2. उत्तराणि-**

1. इदं वनस्य चित्रम् अस्ति |
2. वृक्षस्य अध: एक: जन: तिष्ठति|
3. एक: वानर: वृक्षम् उपतिष्ठति|
4. वानरस्य हस्ते पोटलिका वर्तते|
5. जन: हस्तौ उत्थाय वानरं किञ्चित् कथयति |

**3. उत्तराणि-**

1. अस्मिन् चित्रे एकम् उद्यानम् अस्ति ।
2. अत्र एका बालिका दोलोपरि अस्ति ।
3. चित्रे एका बालिका झूलने डुलति ।
4. द्वौ बालकौ क्रीडतः।
5. एका बालिका चित्रफलके चित्रनिर्माणं करोति

**4. उत्तराणि-**

1. इदम् आपणस्य चित्रं वर्तते ।
2. आपणे कोलाहलं भवति।
3. कदलीफलविक्रेतारः अपि सन्ति ।
4. जनाः शाकानि विक्रीणन्ति।
5. विपण्यां आलूकानि अपि विक्रीयन्ते

# अनुच्छेदम्

## ( 1 ) वृक्षाणाम् महत्त्वम्

वृक्षाः जीवनस्य आधारम् सन्ति। ते अस्मभ्यं छायां फलानि च ददति । वृक्षैः वायुः शुद्धः भवति। ते वर्षां कुर्वन्ति, पृथिवीं सुशीतलां कुर्वन्ति च। वृक्षाः प्रकृतेः भूषणम् सन्ति। ते अस्मभ्यं प्राणवायुः, फलानि, छायां, काष्ठं च ददति। वृक्षैः एव वृष्टिः भवति, भूमेः स्थैर्यं च रक्ष्यते। मानवाः वृक्षान् छिन्दन्ति, किन्तु न रोपयन्ति। एतत् दुःखजनकं कार्यम् अस्ति। यदि वृक्षाः न भविष्यन्ति, तर्हि जीवनं संकटे भविष्यति। अतः वयं वृक्षान् रोपयेम्, रक्षामः च। वृक्षारोपणं राष्ट्रसेवा अपि अस्ति।

*"एकः वृक्षः शतं जीवनानि दत्ते"* इति वाक्यं सत्यमेव।

## ( 2 ) विद्यायाः महत्त्वम्

विद्या मनुष्यस्य जीवनस्य दीपः अस्ति। सा अन्धकारे प्रकाशं ददाति। विद्यया एव मनुष्यः सज्जनः, विद्वान् च भवति। या विद्या धर्मेण सह भवति, सा मोक्षदायिनी अपि अस्ति। विद्या धनं यच्छति, कीर्तिं ददाति, विद्याम् अङ्गीकरोतु च।

## ( 3 ) सत्सङ्गतिः

सतां सज्जनानां सङ्गतिः | सज्जनानां सङ्गत्या हृदयं विचारं च पवित्रम् भवति| अनया: जना: स्वार्थभावं परित्ज्य लोककल्याणस्य काम: कुर्वन्ति | दुर्जनानां सङ्गत्या दुर्बुद्धिः आगच्छति| दुर्बुद्धिः दु:खस्य जननी अस्ति | सज्जनानां सङ्गत्या दुर्जनःअपि सज्जन: भवति|

ऋषीणां सङ्गत्या व्याधः वाल्मीकि: अपि कविवरः वाल्मीकि: अभवत्| रावणस्य सङ्गत्या समुद्र: अपि क्षुद्र: नदीव बन्धनं प्राप्त: | अत: उच्यते- सत्सङ्गति: कथय किं न करोति पुंसाम्|

# संवाद-लेखनम् ( 5 )

**अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत-**

## अभ्यास-1

मोहनः - नमोनमः!(i) .................. कथमस्ति भवान् ?

पितृव्यः - अहम् सम्यक् अस्मि। अपि त्वं स्वस्थ:?

मोहनः - आम्, पितृव्य:|

पितृव्यः - देहल्यां पर्यावरणप्रदूषणेन स्थितिः (ii)........... अस्ति इति श्रुतं मया।

मोहनः - आम्, पितृव्य:!(iii)..... ........स्थितिः तु गंभीरा सञ्जाता। अतएव (iv).......... अपि त्रिदिवसीयः अवकाशः घोषितः|

पितृव्यः- अवकाशः परमनेन किं भविष्यति ?

मोहनः - इदं तु सत्यम्।

पितृव्यः - प्रदूषणस्य (v) .............तु बालैः सह वयस्कानामपि स्वास्थ्ये भवति।

मोहनः - आम्, पितृव्यः! (vi) .............. तु अनेके उपायाः कृताः। वाहनयातायातं (vii).....................इति निर्देशितम्।

पितृव्यः - सर्वकारेण सह (viii) ................अपि प्रदूषणवारणस्य प्रयत्न: करणीयः।

मोहनः - सर्वकारः .(ix)..............अन्यान्नपि उपायान् करोति।

पितृव्यः - वत्स! त्वमपि(x)................... तत्परो भव।

**मञ्जूषा**

| |
|---|
| पितृव्यः, न्यूनीकरणीयम्, भयङ्करी, प्रदूषणनिवारणाय, सर्वकारेण, विद्यालयेषु, सामान्यजनान्, प्रदूषणस्य, दुष्प्रभावः, स्वास्थ्यरक्षणाय |

## अभ्यास-2

कार्तिक: - मातः! गृहात् बहिः(i) **..........** प्रक्षिप्तः अस्ति। कः प्रक्षिप्तवान् अवकरम्?

माता - अहमेव गृहस्य (ii)**...............**कृत्वा अवकरं बहिः प्रक्षिप्तवती । किमभवत्? त्वं किमर्थं पृच्छसि ?

कार्तिक: मातः! किं (iii)**.................** मार्जनेन एव स्वच्छताकार्यं समाप्यते खलु?

माताः - सर्वे स्वगृहमेव परिष्कुर्वन्ति ।

कार्तिक:- मातः! मार्गमुभयतः अवकराणां पर्वतेव दृश्यते, तस्य (iv)................. अस्माकं श्वासे अवरोधं जनयति। एते अवकराः अनेकान् रोगान् अपि जनयन्ति । अत एव अस्माभिः अस्माकं (v)**...............**स्वच्छं करणीयम्।

माता - त्वं सुष्ठु: भणसि। परं किमहमेकाकिनी एव (vi)**...............**परिष्करणं करवाणि?

कार्तिक:- वयम् आरम्भं कुर्मः। शनैःशनैः अन्येऽपि अस्मिन् (vii)**................**सहयोगिनः भविष्यन्ति।

माता - शोभनं वत्सः, परं सद्यः एव तव मनसि स्वच्छतायाः(viii)**...............** कथम् उद्भूत:?

कार्तिक:- अद्य (ix) **..............** स्वच्छताया: महत्त्वविषये (x) **............** पाठितवती|

माता- बहुशोभनम्!

**मञ्जूषा**

| |
|---|
| परिवेशं, पुनीतकर्मणि, विद्यालये, अवकरः, मालिन्यं, संकल्पः, मार्गन्य: मार्जनं, गृहाभ्यन्तरं, आचार्या |

## अभ्यास-3

मधुकरः– माधवि! त्वम् (i)..................किम् आनीतवती असि?

शानवी– मम अल्पाहारपात्रे (ii)................ , पनसशाकं चास्ति।

अद्विक:– मम अल्पाहारे ओदनं(iii) **.................**चास्ति।

मधुकरः– मम माता मह्यं रोटिकां (iv)**.......................**च दत्तवती, परम् मह्यं न रोचते रोटिका, शाकं च।

सरिता– मम पार्श्वे आलुकस्य चिप्सं (v) **..................**चास्ति। किं तुभ्यं रोचते?

मधुकरः– आम्, मह्यं शीतलपेयं रोचते।

आशीषः– अद्यैव शिक्षिका(vi) **.........................** पाठितवती। किं विस्मृतं त्वया यत् चिप्सादिकं स्वास्थ्याय (vii).................... न भवन्ति।

मधुकरः– यद्वस्तु(viii) **..................**न रोचते, तत् वयं कथं खादेम?

आशीषः– सर्वदा (ix)**................** स्मरणीयं यत् रुचिकरं भोजनं सर्वदा (x)**.................**न भवति।

**मञ्जूषा**

| |
|---|
| स्वास्थ्यप्रदं, हितकराणि, तुम्बीफलशाकं, अल्पाहारार्थं, संतुलिताहारविषये, द्विदलं, अस्मभ्यं, रोटिका, तथ्यमिदं, शीतलपेयं |

## अभ्यास-4

आचार्यः– नीरज! किं त्वं स्वजीवनलक्ष्यं (i)**......................?**

नीरजः– आम् गुरवः। अहं (ii)**................**पठिष्यामि।

आचार्यः – शोभनम्, तर्हि चिकित्सको भूत्वा जनसेवां करिष्यसि। उत्तमं (iii) **...........|**

नीरजः – महोदय! चिकित्साक्षेत्रे (iv)**................**अवसरः प्राप्यते। अहं तु चिकित्सको भूत्वा विदेशे जीवनं यापयिष्यामि, इति मम (v)**...........** बलवती इच्छा अस्ति।

आचार्यः – किम् (vi) **.............**विदेशगमनमेव तव जीवनोद्देश्यम्? भारते(vii)**................** कृत्वा विदेशं पलायिष्यसे? किमिदम् उचितम्?

नीरजः – आचार्य! किं (viii) **................**उपयोगं कृत्वा सुविधाकांक्षा नोचिता?

आचार्यः – (ix)............... नास्ति सुविधानां इच्छा, परं स्वदेशं प्रति (x)................. उपेक्षा न करणीयः।

**मञ्जूषा**

| |
|---|
| मनसि, निर्धारितवान्, स्वप्रतिभायाः, जीवनलक्ष्यम्, अध्ययनं, चिकित्साविज्ञानं, धनार्जनाय, बहुधनार्जनस्यापि, अनुचिता, स्वकर्तव्यस्य |

## अभ्यास-5

राजीवः- सोम। पश्य एतत् (i) **..................।**

शोभा:- 'अतीव सुन्दरम्' इति। एतत् तु (ii) **....................** चित्रं प्रतीयते।

राजीवः- आम्, (iii)**............................** स्थिताः एताः अजन्तागुहाः एव।

सौरभः- अहो! दृष्टम्। अत्र तु अनेकानि जातकचित्राणि (iv)**..................**सन्ति।

देविकाः- जातकं किं भवति ?

राजीवः- अहं न जानामि, आचार्यं (v) **................**|

(तत्र गत्वा)

छात्राः- गुरुवर! (vi) **................** किं भवति।

आचार्यः- जातकम् अर्थात् जन्म। (vii)................. इति ग्रन्थे भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु (viii)**...........** सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम्। एतादृशीं कथामेकां कथयामि।

छात्राः- एवम्। वयम् एतादृशीं कथां श्रोतुम् उत्सुकाः।

आचार्यः- श्रूयताम् तावत्। अहं त्वाम् बौद्धचार्यस्य (ix)**.............** जातकमालायाः (x) **......................** एकां कथां श्रावयामि।

### मञ्जूषा

| | | | | | |
|---|---|---|---|---|---|
| चित्रम्, | जातकमाला, | अजन्ता-गुहानां, | जातकं, | शिविजातकाधारिता, | महाराष्ट्रप्रदेशे, |
| परहिताय, | पृच्छामः, | आर्यशूरस्य, | अङ्कितानि | | |

## अभ्यास-6

सुधीरः – श्वः अस्माकं (i)......................अस्ति। न जाने कथं (ii)**................** वर्षाणि व्यतीतानि।

विशालः – (iii)**............................**त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि?

सुधीरः – अहं तु अभियन्त्रविज्ञानं (iv)**................।**

रजनीशः – मया तु चिकित्साविज्ञानं पठिष्यते।

माला – अहं (v)**...........................**पठिष्यामि।

ईशा – अहं "मधुबनीचित्रकला" इत्यस्य प्रशिक्षणं प्राप्य (vi)**...........**चालयिष्यामि। मह्यं चित्राङ्कनम् अतीव रोचते।

विमलः अहमपि कृषिविज्ञानं (vii)**.....................** कृषिकार्यं करिष्यामि।

चन्दनः – अस्मिन् कीदृशम् आश्चर्यम्?

शिवांशः – त्वमपि चन्दन! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य (viii)............ पश्यामि अहम्। त्वं कृषिकार्यं करिष्यसि?

चन्दनः – अथ किम्? (ix) **....................**कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पदः विकासे योगदानं करिष्यामि|

रजनीशः – सम्यक् कथितम्। अधुना तु (x)**..............** भूमिस्वास्थ्यपत्रम् अपि प्रदीयते, येन भूमि-स्वास्थ्यपरीक्षणं भवति।

**मञ्जूषा**

| वैज्ञानिकरीत्या, समावर्तनसंस्कारः, द्रुतगत्या, कुटीरोद्योगं, गणितज्ञं, पठिष्यामि, सर्वकारेण, वस्त्रालङ्करणविज्ञानं, पठित्वा, द्वादशकक्षानन्तरं |
|---|

**अभ्यास-7**

अध्यापकः– प्रवीण! त्वम् अत्र किं (i) ………….. ?

प्रवीणः– हे गुरो! अहम् (ii)………….. किमपि न करोमि।

अध्यापकः– तर्हि गच्छ। तव मित्राणि तत्र (iii)………….. क्रीडन्ति, तैः सह क्रीड।

प्रवीणः– मम(iv)………….. रुचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः– स्वस्थशरीरस्य (v)............ च कृते क्रीडायाः अस्माकं जीवने महती (vi)………….. भवति।

प्रवीणः– यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम (vii)…………. बाधितं भविष्यति।

अध्यापकः– एतद् समीचीनं नास्ति। क्रीडायै (viii)................एव प्रयच्छ। अल्पसमयः अपि शरीराय (ix) ………….. प्रदास्यति।

प्रवीणः– बाढ़म्, श्रीमन्! इतः आरभ्य अहं किञ्चित् समयं (x)…………. अपि दास्यामि।

**मञ्जूषा**

| स्वल्पसमयम्. अध्ययनम्, क्रीडने, बहुलाभम्, अधुना, करोषि, क्रीडाङ्गणे, क्रीडायै, स्वस्थमनसः, आवश्यकता |
|---|

**अभ्यास-8**

पुत्रः- अम्ब! वयं विभिन्नेषु (i) **.............**आकाशवाण्यां, शालायां च 'वन्दे मातरम्' इति गीतं बहुत्र (ii) **..........**। किन्तु अस्य अर्थं न जानीमः। मातः! अस्य कः अर्थः ?

पुत्री- 'इदं गीतं कः (iii)**..............'** इत्यपि मम जिज्ञासा अस्ति।

माता- वत्सौ! महान् (iv)**..........**बङ्किमचन्द्रः चट्टोपाध्यायः १८८२ तमे वर्षे (v)**.............**इति नामकम् उपन्यासं लिखितवान्।

उभौ- वन्दे मातरम्' इत्यस्य कःअर्थः?

माता- 'वन्दे मातरम्' इत्यस्य अर्थः अस्ति यत् 'अहं मातुः (vi)............ करोमि' इति।

पुत्री- मातः! इदं गीतं कस्यां (vii)**..............**अस्ति?,

माता- पुत्रि! एतत् गीतं संस्कृतं(viii) **.............**च इति भाषाद्वये वर्तते।

पुत्रः- मातः! अस्मिन् गीते (ix)**...........**विषयः कः अस्ति?

माता- पुत्र! अस्मिन् गीते (x)**............** स्वरूपस्य रम्यं वर्णनम् अस्ति।

**मञ्जूषा**

| वन्दनं , भारतमातुः, लिखितवान्', भाषायाम्, श्रृणुमः, 'आनन्दमठः' , देशभक्तः, कार्यक्रमेषु, बाङ्ग्ला, वर्ण्यः |
|---|

## अभ्यास-9

| | |
|---|---|
| कविषा- | अहो! योगिते त्वं प्रातः किं करोषि ? |
| योगिता- | अहं प्रतिदिनं प्रातः पित्रा सह (i)**............**गच्छामि। |
| कविषा- | उद्याने किं करोषि भोः ? |
| योगिता- | अहं तु भ्रमणं करोमि । किन्तु बहवः जनाः तत्र व्यायामं (ii)............ च कुर्वन्ति। |
| छात्राः- | अहो! योगासनानि । वयम् अपि (iii) **...........** इच्छामः । तर्हि वयं सर्वे (iv)**................** समीपं गच्छामः । (सर्वे उत्साहेन योगशिक्षिकायाः समीपं गच्छन्ति) |
| छात्राः- | नमो नमः आचार्ये! |
| आचार्या - | शुभं भवतु। (v)**.................** सर्वे। |
| छात्राः- | आचार्ये! किम् अद्य भवती अस्मान् योगासनं (vi)**................** ? |
| आचार्या- | निश्चयेन, (vii)**............**। किम् आसनं शिक्षितुम् इच्छन्ति? |
| योगिता- | आचार्ये! अद्य (viii)**.................** शिक्षयतु। |
| आचार्या - | समीचीनम्। सूर्यनमस्कारः (ix)**...........**आसनानां समाहारः अस्ति। प्रत्येकस्मात् (x) **.............** पूर्वम् एकः मन्त्रः भवति। तेषु प्रथमः मन्त्रः अस्ति 'ॐ मित्राय नमः' इति। |
| छात्राः- | आम्, महोदये! वयं स्मरामः \| |

### मञ्जूषा

| सूर्यनमस्कारं, योगशिक्षिकायाः, उद्यानं, शिक्षयति, योगासनानि, सूर्यनमस्कारात्, ज्ञातुम्, उपविशन्तु, द्वादशानाम्, वदन्तु |
|---|

## अभ्यास-10

| | |
|---|---|
| अध्यापिका- | (भारतस्य मानचित्रे अण्डमान(i) **..........**दर्शयन्ती) एषः भारतस्य (ii)**..........** केन्द्रशासितप्रदेशेषु अन्यतमः अण्डमान-द्वीपसमूहः अस्ति। |
| सर्वे: बालाः - | महोदये! वयम् (iii)**.........**विषये किञ्चित् अधिकं ज्ञातुम् इच्छामः । |
| अध्यापिका:- | अस्तु। भोः सूर्यांश! भवान् किमपि (iv)**..........**इच्छति ? इति प्रतिभाति। |
| सूर्यांशः- | सत्यं महोदये! ह्यः भवती एतस्य पाठस्य विषये (v)**.........**दत्तवती। तदा अहं गृहं गत्वा (vi) **.............**एतस्य अन्वेषणम् अकरवम्। |
| अध्यापिका:- | समीचीनं सूर्यांश! त्वम् किम् अन्विष्टवान् तत्र ? |
| सूर्यांशः- | महोदये! (vii)**..............**अस्य द्वीपस्य नाम 'हण्डुकमान्' आसीत्। एषः शब्दः प्रायः 'हनूमान्' इति शब्दस्य परिवर्तितं रूपम्। |
| दीपेशः- | अहो! अस्य नाम्नः इतिहासः (viii)**........** अस्ति। किन्नु खलु भारतस्य (ix)**.............** अस्य द्वीपस्य काचित् विशिष्टा भूमिका अस्ति? |
| अध्यापिका:- | आम्, महती (x)**..........**अस्ति अस्य द्वीपस्य । |

### मञ्जूषा

| वक्तुम्, रामायणकाले, द्वीपसमूहं, इतिहासे, जालपुटे, अष्टसु, भूमिका, सङ्केतं, एतस्य, अद्भुतः |
|---|

# उत्तरसंकेतः

# संवाद-लेखनम्

**अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत-**

## अभ्यास-1

मोहनः - नमोनमः!(i) **पितृव्यः** कथमस्ति भवान् ?

पितृव्यः - अहम् सम्यक् अस्मि। अपि त्वं स्वस्थ:?

मोहनः - आम्, पितृव्य:|

पितृव्यः - देहल्यां पर्यावरणप्रदूषणेन स्थितिः (ii) **भयङ्करी** अस्ति इति श्रुतं मया।

मोहनः - आम्, पितृव्य:! **(iii) प्रदूषणस्य** स्थितिः तु गंभीरा सञ्जाता। अतएव (iv) **विद्यालयेषु** अपि त्रिदिवसीयः अवकाशः घोषितः|

पितृव्यः- अवकाशः परमनेन किं भविष्यति ?

मोहनः - इदं तु सत्यम्।

पितृव्यः - प्रदूषणस्य (v) **दुष्प्रभावः** तु बालैः सह वयस्कानामपि स्वास्थ्ये भवति।

मोहनः - आम्, पितृव्यः! **(vi) सर्वकारेण** तु अनेके उपायाः कृताः। वाहनयातायातं (vii) **न्यूनीकरणीयम्** इति निर्देशितम्।

पितृव्यः - सर्वकारेण सह (viii)**सामान्यजनान्** अपि प्रदूषणवारणस्य प्रयन्तः करणीयः।

मोहनः - सर्वकारः (ix) **प्रदूषणनिवारणाय,** अन्यान्नपि उपायान् करोति।

पितृव्यः - वत्स! त्वमपि (x) **स्वास्थ्यरक्षणाय** तत्परो भव।

## अभ्यास-2

कार्तिक: - मातः! गृहात् बहिः (i) **अवकरः** प्रक्षिप्तः अस्ति। कः प्रक्षिप्तवान् अवकरम्?

माता - अहमेव गृहस्य (ii)**मार्जनं** कृत्वा अवकरं बहिः प्रक्षिप्तवती । किमभवत्?
त्वं किमर्थं पृच्छसि ?

कार्तिक: मातः! किं (iii) **गृहाभ्यन्तरं** मार्जनेन एव स्वच्छताकार्यं समाप्यते खलु?

माता - सर्वे स्वगृहमेव परिष्कुर्वन्ति ।

कार्तिक:- मातः! मार्गमुभयतः अवकराणां पर्वत इव दृश्यते, तस्य (iv) **मालिन्यं** अस्माकं श्वासे अवरोधं जनयति। एते अवकराः अनेकान् रोगान् अपि जनयन्ति अतएव अस्माभिः अस्माकं (v) **परिवेशं** स्वच्छं करणीयम्।

माता - त्वं सुष्ठु: भणसि। परं किमहमेकाकिनी एव (vi) **मार्गन्य:** परिष्करणं करवाणि?

कार्तिक:- वयम् आरम्भं कुर्मः। शनैःशनैः अन्ये अपि अस्मिन् **(vii) पुनीतकर्मणि** सहयोगिनः भविष्यन्ति।

माता - शोभनं वत्सः परं सद्यः एव तव मनसि स्वच्छतायाः (viii) **सङ्कल्पः** कथम् उद्भूत:?

कार्तिक:- अद्य (ix) **विद्यालये** स्वच्छताया: महत्त्वविषये (x) **आचार्या** पाठितवती|

माता- बहुशोभनम्!

## अभ्यास-3

मधुकरः – माधवि! त्वम् (i) **अल्पाहारार्थं** किम् आनीतवती असि?

शानवी – मम अल्पाहारपात्रे (ii) **रोटिका,** पनसशाकं चास्ति।

अद्विक: – मम अल्पाहारे ओदनं (iii) **द्विदलं** चास्ति।

मधुकरः – मम माता मह्यं रोटिकां (iv) **तुम्बीफलशाकं** च दत्तवती, परम् मह्यं न रोचते रोटिका, शाकं च।

सरिता – मम पार्श्वे आलुकस्य चिप्सं (v) **शीतलपेयं** चास्ति। किं तुभ्यं रोचते?

मधुकरः – आम्, मह्यं शीतलपेयं रोचते।

आशीषः – अद्यैव शिक्षिका (vi) **संतुलिताहारविषये** पाठितवती। किं विस्मृतं त्वया यत् चिप्सादिकं स्वास्थ्याय (vii) **हितकराणि** न भवन्ति।

मधुकरः – यद्वस्तु (viii) **अस्मभ्यं** न रोचते, तत् वयं कथं खादेम?

आशीषः – सर्वदा(ix) **तथ्यमिदं** स्मरणीयं यत् रुचिकरं भोजनं सर्वदा (x) **स्वास्थ्यप्रदं** न भवति।

## अभ्यास-4

आचार्यः– नीरज! किं त्वं स्वजीवनलक्ष्यं (i)**निर्धारितवान्?**

नीरजः– आम्, गुरवः। अहं (ii)**चिकित्साविज्ञानं** पठिष्यामि।

आचार्यः – शोभनम्, तर्हि चिकित्सको भूत्वा जनसेवां करिष्यसि। उत्तमं (iii)**जीवनलक्ष्यम्।**

नीरज: – महोदय! चिकित्साक्षेत्रे (iv) **बहुधनार्जनस्यापि** अवसरः प्राप्यते। अहं तु चिकित्सको भूत्वा विदेशे जीवनं यापयिष्यामि, इति मम (v)**मनसि** बलवती इच्छा अस्ति।

आचार्यः – किम् (vi) **धनार्जनाय** विदेशगमनमेव तव जीवनोद्देश्यम्? भारते (vii) **अध्ययनं** कृत्वा विदेशं पलायिष्यसे? किमिदम् उचितम्?

नीरज: – आचार्य! किं (viii) **स्वप्रतिभायाः** उपयोगं कृत्वा सुविधाकांक्षा नोचिता?

आचार्यः – (ix)**अनुचिता** नास्ति सुविधानां इच्छा, परं स्वदेशं प्रति (x)**स्वकर्त्तव्यस्य** उपेक्षा न करणीया।

## अभ्यास-5

राजीव:- सोम! पश्य एतत्(i) **चित्रम्।**

शोभा- 'अतीव सुन्दरम्' इति। एतत् तु (ii)**अजन्ता-गुहानां** चित्रं प्रतीयते।

राजीवः- आम्, (iii)**महाराष्ट्रप्रदेशे** स्थिताः एताः अजन्तागुहाः एव।

सौरभः- अहो! दृष्टम्। अत्र तु अनेकानि जातकचित्राणि (iv)**अङ्कितानि** सन्ति।

देविका- जातकं किं भवति ?

राजीवः- अहं न जानामि, आचार्यं (v)**पृच्छामः**| (तत्र गत्वा)

छात्राः- गुरुवर! (vi)**जातकं** किं भवति?

आचार्यः- जातकम् अर्थात् जन्म।(vii) **'जातकमाला'** इति ग्रन्थे भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु (viii) **परहिताय** सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम्। एतादृशीं कथामेकां कथयामि।

छात्राः- एवम्। वयम् एतादृशीं कथां श्रोतुम् उत्सुकाः।

आचार्यः- श्रूयताम् तावत्। अहं त्वां बौद्धचार्यस्य(ix)**आर्यशूरस्य** जातकमालायाः(x) **शिविजातकाधारिता** एकां कथां श्रावयामि।

## **अभ्यास-6**

सुधीरः – श्वः अस्माकं (i) **समावर्तनसंस्कारः** अस्ति। न जाने कथं (ii)**द्रुतगत्या** वर्षाणि व्यतीतानि।
विशालः – (iii) **द्वादशकक्षानन्तरं** त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि?
सुधीरः – अहं तु अभियन्त्रविज्ञानं (iv) **पठिष्यामि।**
रजनीशः – मया तु चिकित्साविज्ञानं पठिष्यते।
माला – अहं (v)**वस्त्रालङ्करणविज्ञानं** पठिष्यामि।
ईशा – अहं "मधुबनीचित्रकला" इत्यस्य प्रशिक्षणं प्राप्य (vi) **कुटीरोद्योगं** चालयिष्यामि। मह्यं चित्राङ्कनम् अतीव: रोचते।
विमलः– अहमपि कृषिविज्ञानं (vii)**पठित्वा** कृषिकार्यं करिष्यामि।
चन्दनः – अस्मिन् कीदृशम् आश्चर्यम्?
शिवांशः – त्वमपि चन्दन! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य (viii) **गणितज्ञं** पश्यामि अहम्। त्वं कृषिकार्यं करिष्यसि?
चन्दनः – अथ किम्? (ix) **वैज्ञानिकरीत्या** कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पदः विकासे योगदानं करिष्यामि|
रजनीशः – सम्यक् कथितम्। अधुना तु (x)**सर्वकारेण** भूमिस्वास्थ्यपत्रम् अपि प्रदीयते, येन भूमिस्वास्थ्य-परीक्षणं भवति।

## **अभ्यास-7**

अध्यापकः– प्रवीण! त्वम् अत्र किं (i)**करोषि** ?
प्रवीणः – हे गुरो! अहम् (ii)**अधुना** किमपि न करोमि।
अध्यापकः – तर्हि गच्छ। तव मित्राणि तत्र (iii)**क्रीडाङ्गणे** क्रीडन्ति, तैः सह क्रीड।
प्रवीणः– मम **(iv) क्रीडने** रुचिः नास्ति । अतः अहं न क्रीडामि ।
अध्यापकः – स्वस्थशरीरस्य (v) **स्वस्थमनसः** च कृते क्रीडायाः अस्माकं जीवने महती (vi) **आवश्यकता** भवति ।
प्रवीणः – यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम **(vii) अध्ययनं** बाधितं भविष्यति।
अध्यापकः– एतद् समीचीनं नास्ति। क्रीडायै (viii) **स्वल्पसमयम्** एव प्रयच्छ। अल्पसमयः अपि शरीराय **(ix) बहुलाभम्** प्रदास्यति ।
प्रवीणः– बाढ़म्, श्रीमन्! इतः आरभ्य अहं किञ्चित् समयं (x) **क्रीडायै,** अपि दास्यामि।

## **अभ्यास-8**

पुत्र:- अम्ब! वयं विभिन्नेषु (i)**कार्यक्रमेषु,** आकाशवाण्यां, शालायां च 'वन्दे मातरम्' इति गीतं बहुत्र (ii) **श्रृणुमः**। किन्तु अस्य अर्थं न जानीमः। मातः! अस्य कः अर्थः ?
पुत्री- 'इदं गीतं कः (iii)**लिखितवान्'** इत्यपि मम जिज्ञासा अस्ति।
माता- वत्सौ! महान् (iv)**देशभक्तः** बङ्किमचन्द्रः चट्टोपाध्यायः 1982 तमे वर्षे (v) **'आनन्दमठः'** इति नामकम् उपन्यासं लिखितवान्।

उभौ- 'वन्दे मातरम्' इत्यस्य क:अर्थः?

माता- 'वन्दे मातरम्' इत्यस्य अर्थः अस्ति यत् 'अहं मातुः(vi) **वन्दनं** करोमि' इति।

पुत्री- मातः! इदं गीतं कस्यां (vii) **भाषायाम्** अस्ति?,

माता- पुत्रि! एतत् गीतं संस्कृतं (viii) **बाङ्ग्ला** च इति भाषाद्वये वर्तते।

पुत्रः- मातः! अस्मिन् गीते (ix) **वर्ण्यः** विषयः कः अस्ति?

माता- पुत्र! अस्मिन् गीते (x) **भारतमातुः** स्वरूपस्य रम्यं वर्णनम् अस्ति।

## अभ्यास-9

कविषा- अहो! योगिते त्वं प्रातः किं करोषि ?

योगिता- अहं प्रतिदिनं प्रातः पित्रा सह (i)**उद्यानं** गच्छामि।

कविषा- उद्याने किं करोषि भोः ?

योगिता- अहं तु भ्रमणं करोमि । किन्तु बहवः जनाः तत्र व्यायामं (ii) **योगासनानि** च कुर्वन्ति।

छात्राः- अहो! योगासनानि । वयम् अपि (iii) **ज्ञातुम्** इच्छामः । तर्हि वयं सर्वे (iv) **योगशिक्षिकायाः** समीपं गच्छामः ।

(सर्वे उत्साहेन योगशिक्षिकायाः समीपं गच्छन्ति)

छात्राः- नमो नमः आचार्ये!

आचार्या - शुभं भवतु। (v)**उपविशन्तु** सर्वे।

छात्राः- आचार्ये! किम् अद्य भवती अस्मान् योगासनं (vi)**शिक्षयति** ?

आचार्या- निश्चयेन,(vii) **वदन्तु**। किम् आसनं शिक्षितुम् इच्छन्ति?

योगिता:- आचार्ये! अद्य (viii)**सूर्यनमस्कारं** शिक्षयतु।

आचार्या - समीचीनम् । सूर्यनमस्कारः (ix)**द्वादशानाम्** आसनानां समाहारः अस्ति। प्रत्येकस्मात् (x) **सूर्यनमस्कारात्** पूर्वम् एकः मन्त्रः भवति। तेषु प्रथमः मन्त्रः अस्ति 'ॐ मित्राय नमः' इति।

छात्राः- आम् महोदये ! वयं स्मरामः |

## अभ्यास-10

अध्यापिका- (भारतस्य मानचित्रे अण्डमान(i) **द्वीपसमूहं** दर्शयन्ती) एषः भारतस्य (ii) **अष्टसु** केन्द्रशासितप्रदेशेषु अन्यतमः अण्डमान-द्वीपसमूहः अस्ति।

सर्वे बालाः- महोदये! वयम् (iii)**एतस्य** विषये किञ्चित् अधिकं ज्ञातुम् इच्छामः|

अध्यापिका- अस्तु। भोः सूर्यांश! भवान् किमपि(iv) **वक्तुम्** इच्छति ? इति प्रतिभाति।

सूर्यांशः- सत्यं, महोदये! ह्यः भवती एतस्य पाठस्य विषये (v) **सङ्केतं** दत्तवती। तदा अहं गृहं गत्वा (vi) **जालपुटे** एतस्य अन्वेषणम् अकरवम्।

अध्यापिका- समीचीनं सूर्यांश! त्वं किम् अन्विष्टवान् तत्र ?

सूर्यांशः- महोदये! (vii)**रामायणकाले** अस्य द्वीपस्य नाम 'हण्डुकमान्'आसीत्। एषः शब्दः प्रायः 'हनूमान्' इति शब्दस्य परिवर्तितं रूपम्।

दीपेशः- अहो! अस्य नाम्नः इतिहासः (viii)**अद्भुतः** अस्ति। किन्नु खलु भारतस्य (ix) **इतिहासे** अस्य द्वीपस्य काचित् विशिष्टा भूमिका अस्ति?

अध्यापिका- आम्, महती (x)**भूमिका** अस्ति अस्य द्वीपस्य ।

# कथा-पूर्तिः

## अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत- ( 5 )

|---|---|---|---|
| प्रथम: पुरुष: | अस्तु | स्ताम् | सन्तु |
| मध्यम: पुरुष: | एधि | स्तम् | स्त |
| उत्तम: पुरुष: | असानि | असाव | असाम |

### विधिलिङ् लकार: ( चाहिए अर्थ में )

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम: पुरुष: | स्यात् | स्याताम् | स्यु: |
| मध्यम: पुरुष: | स्या: | स्यातम् | स्यात |
| उत्तम: पुरुष: | स्याम् | स्याव | स्याम |

## ‘प्रच्छ्’ धातुः

### लट् लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पृच्छति | पृच्छतः | पृच्छन्ति |
| मध्यमः पुरुषः | पृच्छसि | पृच्छथः | पृच्छथ |
| उत्तमः पुरुषः | पृच्छामि | पृच्छावः | पृच्छामः |

### लृट् लकारः (भविष्यत् काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | प्रक्ष्यति | प्रक्ष्यतः | प्रक्ष्यन्ति |
| मध्यमः पुरुषः | प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ |
| उत्तमः पुरुषः | प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः |

### लङ् लकारः (भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमः पुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छत |
| उत्तमः पुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

### लोट् लकारः ( आज्ञा अर्थ में )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पृच्छतु | पृच्छताम् | पृच्छन्तु |
| मध्यमः पुरुषः | पृच्छ | पृच्छतम् | पृच्छत |
| उत्तमः पुरुषः | पृच्छानि | पृच्छाव | पृच्छाम |

### विधिलिङ् लकारः ( चाहिए अर्थ में )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पृच्छेत् | पृच्छेताम् | पृच्छेयुः |
| मध्यमः पुरुषः | पृच्छेः | पृच्छेतम् | पृच्छेत |
| उत्तमः पुरुषः | पृच्छेयम् | पृच्छेव | पृच्छेम |

# ‘सेव्’ धातुः
# आत्मनेपदी

## लट् लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यमः पुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तमः पुरुष; | सेवे | सेवावहे | सेवामहे |

## लृट् लकारः (भविष्यत् काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमः पुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमः पुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## प्रश्नाः

**क. उचितविकल्पेन रिक्तस्थानानि पूरयत-**

1. बालकस्य अत्र रक्षकः न …………………I

(क) अस्ति (ख) अस्मि (ग) सन्ति (घ) स्थः

2. अहं भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान्............................I

(क) करिष्यति (ख) करिष्यसि (ग) करिष्यामि (घ) करिष्यामः

3. हे श्वेतकेतो! त्वं गुरुं प्रति.....................I

(क) गच्छतु (ख) गच्छानि (ग) गच्छाम (घ) गच्छ

4. शिष्याय अध्ययनं .......................I

(क) रोचावहे (ख) रोचे (ग) रोचते (घ) रोचन्ते

**ख. कोष्ठकात् उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत-**

1. अष्टावक्रः शास्त्रार्थं कृत्वा पण्डितान्.....................................|( अजयम् / अजयन् / अजयत् )

2. राजन् ! अहं भवद्राज्ये निवस्तुम्.............................................I ( इच्छति / इच्छामि / इच्छसि )

3. जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं सङ्गीतं................I ( जनयति / जनयसि / जनयन्ति )

4. बालक: सदा सत्यं .................. I ( वदसि / वदन्ति / वदति )

5. सीता रामेण सह वनं ....................... I ( अगच्छत् / अगच्छ / अगच्छम् )

# प्रत्ययाः

**1. रेखाङ्कित्तपदानां प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा रिक्तस्थानानि पूरयत ।**

1. परोपकारं कृ + क्त्वा नरः पुण्यं लभते।

(क) क्रत्वा (ख) करित्वा (ग) कृत्वा

2. निर्धनेभ्यः वस्त्राणि दा + क्त्वा धनिकः सन्तुष्टः अभवत्।

(क) दात्वा (ख) दत्वा (ग) यच्छित्वा

3. वयं गृहं गन्तुम् इच्छामः।

(क) गम् + तुमुन् (ख) गम् + क्तवतु (ग) गम् + क्त्वा

4. गोपालः विद्यालयात् आगत्य गृहकार्यं करोति।

(क) आ + गम् + त्य (ख) आ + गम् + ल्यप् (ग) आ + गम् + क्त

5. रविः पठ् + क्त्वा क्रीडति।

(क) पठ्त्वा (ख) पठत्वा (ग) पठित्वा

6. राधिका धावन्ती मातुः सेवां करोति।

(क) धाव् + क्तवतु (ख) धाव् + शतृ (ग) धाव् + शानच्

7 बालकः दुग्धम् पा + क्त्वा संतुष्टः भवति।

(क) पिबित्वा (ख) पीत्वा (ग) पात्वा

8. सा चिटिकां क्री + तुमुन् पङ्क्तौ तिष्ठति।

(क) क्रीतुम् (ख) क्रेतुम् (ग) क्रतुम्

9 बालः जलम् आनीय वृक्षान् सिञ्चति।

(क) आ + नी + क्त (ख) आ + नी + ल्यप् (ग) आ + नि + ल्यप्

10 मित्राणि जन्तुशालां परि + भ्रम् + ल्यप् मृगान् अपश्यन् ।

(क) परिभ्रमल्य (ख) परिभ्रमीय (ग) परिभ्रम्य

**2. रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत-**

1. **भू + क्त्वा**

(क) भूतं (ख) भू क्त्वा (ग) भवितुम् (घ) भूत्वा

**2. दा + तुमुन्**

(क) दातुमुन् (ख) दातुम् (ग) दतुमुन् (घ) दाम्

**3. प्र + दा + ल्यप्**

(क) प्रदाय (ख) प्रदानम् (ग) प्रदाप् (घ) प्रदायिन्

**4. पठ् + क्त्वा**

(क) पठत्वा (ख) पठनम् (ग) पठित्वा (घ) पठम्

**3. रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत- ( केवलं त्रयम् )**

1. तानि एव मिलित्वा पृथक्तया वा अस्माकम् पर्यावरणम् रचयन्ति।

    क. मिल् + त्वा　　　　ख. मिल् + क्त्वा

    ग. मिलि + कत्वा　　　　घ. मिल् + त्व

2. चित्रविचित्रवस्तूनि दृष्ट्वा गम्+शतृ सा विस्मयं प्राप्तवती।

    क. गच्छन्ती　　　　ख. गता

    ग. गच्छन्　　　　घ. गच्छन्ति

3. रामस्य सेना लंकाम् गम् + तुमुन् सेतुम् निर्माणं करोति।

    क. गत्वा　　　　ख. गातुम्

    ग. गन्तुम्　　　　घ. गतम्

4. बालिका विहस्य वस्तुम् स्वीकरोति।

    क. विहस् + य　　　　ख. वि + हस्य

    ग. विहस् + ण्यत्　　　　घ. वि + हस् + ल्यप्

## अव्ययानि

**1. प्रदत्तविकल्पेभ्यः समुचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत-**

1. सत्यम् ........................... जयते।

    (क) अलम्　　(ख) नमः　　(ग) एव　　(घ) अपि

2. रमा..........स्वमातुः संस्कृतशिक्षां प्राप्तवती।

    (क) अति　　(ख) अघि　　(ग) अपि　　(घ) उपरि

3. अत्र..........अपि निराश्रिताः स्त्रियः ससम्मानं जीवनं यापयन्ति।

    (क) तदा　　(ख) अधुना　　(ब) पश्तिः　　(ग) अधः

4. ईश्वर: ................वर्तते।

    (क) तथापि　　(ख) कदापि　　(ग) सर्वत्र　　(घ) सदा

5. भक्तः.................ईश्वरं भजति|

    (क) अपि　　(ख) च　　(ग) सर्वदा　　(घ) तथा

**2. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदतै: उचितै: अव्ययपदै: पूरयित्वा लिखत-**

**(यदा,　श्वः,　तदा,　ह्यः)**

(i) **…………….** आम्रवृक्षा**:** प्रफुल्लन्ति तदा कोकिला**:** अपि गायन्ति।

(ii) रमेशः**……………** मातुलस्य गृहं गमिष्यति।

(iii) **…………….** रमायाः जन्मदिवसः आसीत्।

(iv) यदा चौरः आयाति**…………..** कुक्कुरा**:** बुक्कन्ति।

**3. प्रदत्तविकल्पेभ्यः समुचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत-**

1. त्वं .......................... वससि?

   (क) कुतः (ख) कुत्र (ग) किम् (घ)कति

2. अहम् .......................... धर्मशालायां वसामि।

   (क) सर्वदा (ख) कदा (ग) अत्र (घ) यत्र

3. स्वभाव: .......................... एषः परोपकारिणाम्।

   (क) अपि (ख) एव (ग) च (घ) सम्यक्

4. देशं धर्मं .......................... रक्षितुम्।

   (क) कुतः (ख) अपि (ग) किम् (घ) च

5. .......................... विद्योतमा तत्र कालिदासः।

   (क) यत्र (ख) अत्र (ग) यदि (घ) यदा

6. .......................... इदं भवान् करोति?

   (क) एकदा (ख) पुरा (ग) किम् (घ) कति

7. प्रदेशोऽयम् अस्माभिः त्याज्य .......................... ।

   (क) च (ख) एव (ग) सम्यक् (घ) सर्वत्र

8. यदि सः पठति .......................... उत्तीर्णः भविष्यति।

   (क) एव (ख) ह्यः (ग) अपि (घ) तर्हि

9. विद्वान् .......................... कर्मं करोति।

   (क) सम्यक् (ख) एव (ग) कदा (घ) कुत्र

10. वायुः .......................... समानरूपेण प्रवहति।

    (क) एकत्र (ख) पुरा (ग) सर्वत्र (घ) एकदा

## संख्या

**1. प्रदत्तरिक्तस्थानानि संङ्ख्यावाचिपदैः पूरयत-**

1. निम्बवृक्षे...................... खगौ तिष्ठतः।

   (क) द्वौ (ख) द्वे (ग) द्वि

2. तस्य .....................भगिन्यः सन्ति।

   (क) चतस्रः (ख) चतुरः (ग) चत्वारः

3. वेदा:............... सन्ति।

   (क) चत्वारि (ख) चत्वारः (ग) चतुर

4. दशरथस्य .........राज्ञ्यः आसन्।

   (क) तिस्रः (ख) त्रीणि (ग) त्रयः

5. ........................बालकाः कन्दुकेन सह क्रीडन्ति।

   (क) चत्वारः (ख) चतुर्भिः (ग) चतुर्थ्यः

6. .................वृक्षाभ्यां फलानि पतन्ति।

(क) द्वे (ख) द्वेभ्याम् (ग) द्वाभ्याम्

7. अस्मिन् कक्षे..................... बालिकाः सन्ति।

(क) त्रीणि (ख) तिस्रः (ग) त्रयः

8. ............................. पाण्डवाः आसन्।

(क) पञ्च (ख) पञ्चभिः (ग) पञ्चसु

9. तस्य............... मित्रे स्तः।

(क) द्वि (ख) द्वे (ग) द्वौ

10. सः....................... कथां लिखति।

(क) एकाम् (ख) एके (ग) एकम्

11. अहं तुभ्यम् ................निमन्त्रणपत्रं दास्यामि।

(क) एकः (ख) एकस्मिन् (ग) एकम्

12...................... सरोवरेषु नीलकमलानि सन्ति।

(क) त्रयेषु (ख) त्रिपु (ग) तिसृषु

13. विद्यालये मया.............वृक्षाः आरोपिताः।

(क) चत्वारि (ख) चत्वारः (ग) चतुराः

14. तस्मिन् वने............................ विशालौ वृक्षौ स्तः।

(क) द्वौ (ख) द्वाभ्याम् (ग) द्वे

15. तेन संस्कृतभाषायाम् ...................कथा लिखिता।

(क) एकम् (ख) एका (ग) एकस्मिन्

**2. अन्कान् दृष्ट्वा रिक्तस्थानानि संख्या वाचक-पदैः पूरयत-**

(1) विद्यालये **…………… (10)** कक्षा**:** सन्ति।

(2) **…….. (3)** बालकाः क्रीडन्ति।

(3) **……. (1)** बालिका सस्वरं श्लोकपाठं करोति।

(4) पुष्पेषु**……… (3)**कमलपुष्पाणि सन्ति।

**3. संख्यावाचि-पदानां कृते संस्कृतभाषायाम् उचितं रूपं लिखित्वा रिक्तस्थानानि पूरयत।**

क. वेदा: -------------------- (4) सन्ति ।

ख. परिवारे -------------------- (3) कन्याः सन्ति ।

ग. मोहन: -------------------- (75) प्रतिशताङ्कान् प्राप्तवान् ।

घ. विद्यालये -------------------- (28) कक्षा: सन्ति ।

ङ. पिता पुत्राय -------------------- (100) रुप्यकाणि ददाति

## उच्चारणस्थानानि

**उत्तराणि-** 1. क) कण्ठः, 2. ख) मूर्धा, 3. ख) कण्ठः, 4. क) कण्ठः, 5. ग) मूर्धन्य:
6. ख) दन्ताः 7. क) तालव्य: 8. क) श् 9. ख) नासिक्याः 10. क) र्

## सन्धिः

### उत्तराणि

1. (घ) पुस्तक + आलयम् , 2. (क) विद्या + अर्थिनः, 3. (घ) लोक + एषणा, 4. (ख) परम + ईश्वरः
5. (ग) हित + उपदेशात् 6. (घ) यद्यपि, 7. (ख) क: + चित् 8. (क) अध्ययन + अर्थम्
9. (क) बृह: + पति: 10. (ख) महा + उत्साहः 11. (क) किं करोति 12. (क) जगत् + ईश्वरः
13. (क) अत्यधिकम् 14. (ग) महा + ईशः 15. (ख) न + अस्ति 16. (क) प्रतिकूल + उपहितम्
17. (क) स + अर्थान् 18. (क) पञ्चेन्द्रियाणि 19. (घ) गुरौ+ आगते 20. (क) प्रति + एक:

## कारक-उपपदविभक्तयः

### उत्तराणि

1. सलिले, 2. शुण्डेण, 3. ग्रामं, 4. हरये, 5. गृहात्, 6. रामं, 7. बालकाय, 8. बिडालात्, 9. शिशवे, 10. भूमेः, 11. वर्गे, 12. सत्येन, 13. विवादेन, 14. रमायाः, 15. ग्रामम्, 16. मञ्चस्य, 17. गर्ते, 18. विद्याम्, 19. मित्रैः, 20. दशरथस्य, 21. चौरात्, 22. हिमालयात्, 23. सूर्याय, 24. पुत्र्यां, 25. ग्रामं

## शब्दरूपाणि

**उत्तराणि- 1. वशिष्ठस्य, 2. हिंसा, 3. पत्रिकायाम्, 4. उद्याने, 5. विद्यालयस्य**
**6. रामायणस्य, 7. वन्दनां, 8. बालकाय, 9. कन्याभिः, 10. अस्माकं**

## धातुरूपाणि

**उत्तराणि-**

**क.**

**(1) (क) अस्ति 2. (ग) करिष्यामि 3. (घ) गच्छ् 4. (ग) रोचते**

**ख.**

**1. अजयत् 2. इच्छामि, 3. जनयन्ति 4. वदति, 5. अगच्छत्**

# प्रत्ययाः

**उत्तराणि** – ( 1 )

**1. (ग), 2. (ख), 3. (क), 4. (ख), 5. (ग),**
**6. (ख), 7. (ख) 8. (ख) 9. (ख) 10. (ग)**

**उत्तराणि** – ( 2 )

**1.** (घ) भूत्वा **2.** (ख) दातुम् **3.** (क) प्रदाय **4.** (ग) पठित्वा

**उत्तराणि- ( 3 )**
**1. ख. मिल् + क्त्वा, 2. क. गच्छन्ती, 3. ग. गन्तुम्, 4. घ. वि + हस् + ल्यप्**

# अव्ययानि

**उत्तराणि –( 1 )**
**1. (ग), 2. (ग), 3. (ख), 4. (ग), 5. (ग),**
**उत्तराणि –( 2 )**
**1. यदा 2. श्वः 3. ह्यः 4. तदा**
**उत्तराणि- ( 3 )**
**1. (ख) कुत्र 2. (ग) अत्र 3. (ख) एव 4. (घ) च 5. (क) यत्र**
**6. (ग) किम् 7. (ख) एव 8. (घ) तर्हि 9. (क) सम्यक् 10. (ग) सर्वत्र**

# संख्या

**उत्तराणि ( I )**

**1. (क), 2. (क), 3. (ख), 4. (क), 5. (क),**
**6. (ग), 7. (ख), 8. (क), 9. (ख), 10. (क)**
**11. (ग), 12. (ख), 13. (ख), 14. (क), 15. (ग)**

**II. 1. दश 2. त्रयः 3. एका 4. त्रीणि**

**III.**
**1. चत्वारः, 2. तिस्रः, 3. पञ्चसप्ततिः, 4. अष्टाविंशतिः, 5. शतम्**

# पठितावबोधनम् ( 30 )

## गद्यांशाः

**1.**

**अधोलिखितं पठितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्त: मुख-पाद: तस्य चरणयोः अलुंठत् | विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान् | अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति | ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत् | अत उच्यते –

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् |
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ||

**एकपदेन उत्तरत-** **( ½ x2=1 )**

(क) ब्राह्मणः कोपात् कम् व्यापादितवान् ?

(ख) नकुलेन कः व्यापादितः ?

(ग) नकुलस्य मुखपादाः केन विलिप्ताः ?

**पूर्णवाक्येन उत्तरत-** **( 2x1=2 )**

(क) परमापदां पदं किम् ?

(ख) कीदृशः नकुलः ब्राह्मणस्य चरणयोः अलुठत् ?

**भाषिक कार्यम् -** **( 1x2=2 )**

क) 'नकुलः रक्तविलिप्त:'- अत्र विशेषणपदं किम् ?

ख) 'बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति' अस्मिन् वाक्ये बालिकाया: विलोमपदं किम् अस्ति?

ग) 'नकुलः तस्य चरणयोः अलुंठत्'- अत्र कर्तृपदं किम् अस्ति?

**2.**

**अधोलिखितं पठितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

भोजः - साधु कुविन्द! साधु! कीदृशी लालित्यपूर्णा पदयोजना 'कवयामि वयामि यामि'- धन्योऽसि त्वम्। अहमपि आत्मानं धन्यं मन्ये, यस्य राज्ये तन्तुवाया:, अयस्कारा:, शिल्पिनः, श्रमिका: अपि ललितां काव्यरचनां कुर्वन्ति।

(तन्तुवायं प्रति ) भोः कविवर! गृहाण पुष्कलं स्वर्णमयं पारितोषिकंI निजम् आवासम् च प्रयाहि I (मन्त्रिणं प्रति) पण्डितः लक्ष्मीधर: मम राजभवने वासयितव्य: यावद् अपरा व्यवस्था न भवति।

**एकपदेन उत्तरत-** **( ½ x2=1 )**

(क) पण्डितः कुत्र वासयितव्य: ?

(ख) पदयोजना कीदृशी आसीत्?

(ग) पण्डितस्य नाम क: अस्ति?

**पूर्णवाक्येन उत्तरत-** **( 2x1=2 )**

(क) आत्मानं क: धन्यं मन्ये ?

(ख) भोजस्य राज्ये के ललितां काव्यरचनां कुर्वन्ति?

**भाषिक कार्यम् -** **( 1x2=2 )**

(1) "धन्योऽसि त्वम्"- इत्यत्र कर्तृपदं किम् ?

(2) "श्रमिका: अपि ललितां काव्यरचनां कुर्वन्ति" अत्र विशेषणपदं किम् अस्ति ?

(3) "अन्या"- अनुच्छेदे पर्यायपदं किं प्रयुक्तम् ?

**3.**

**अधोलिखितं पठितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

एकदा अयं मुनिः क्वापि नगरे एकं ब्राह्मणगृहम् प्राप्य तद्गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तम् अवदत्– "प्रतीक्षस्व क्षणं, यावद् भर्तुः परिचर्यां समापये" इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत्- "मुने ! न अहं बलाकेति"। तत् आकर्ण्य विस्मितः मुनिः "एतत् कथमिव ज्ञातमनया" इति चिन्तयन् तत्र उपाविशत् ।

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् – "कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।"

**एकपदेन उत्तरत-** **( ½ x2=1 )**

क) मुनिः कां भिक्षाम् अयाचत्?

ख) गृहिणी कस्य परिचर्यां करोति स्म?

ग) साध्वी भिक्षामादाय कस्य अन्तिकम् आगता?

**पूर्णवाक्येन उत्तरत-** **( 2x1=2 )**

क) मुनिः किं चिन्तयन् तत्र उपाविशत्?

ख) सा पतिव्रता गृहिणी मुनिम् किम् अवदत्?

**भाषिक कार्यम् -** **( 1x2=2 )**

क) 'सा पतिव्रता गृहिणी तं अवदत्' वाक्ये अस्मिन् किं विशेषणपदम् प्रयुक्तम्?

ख) 'ऋषि:' इति पर्यायपदं किं प्रयुक्तम्?

ग) 'सा विहस्य अभाषत्'- अस्मिन् वाक्ये कर्तृपदं किं प्रयुक्तम्?

**4.**

**अधोलिखितं पठितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

स मुनि: समन्विष्य तं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत् I धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत्- "ब्रह्मन्! किं पतिव्रतया तया इह त्वं प्रेषित:?" तत् आकर्ण्य स मुनिर्विस्मित: तं धर्मव्याधम् अवदत्-"भद्र! मांसविक्रयिण: ते कथम् ईदृशं विज्ञानम्"? धर्मव्याध: अवदत्-"ब्रह्मन्! अहं मातापित्रोर्भक्तः। तौ हि मम परायणम् । अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि I शाययित्वा च स्वपिमि I तेन मे एतादृशं विज्ञानम्I अन्यहतानां च मृगादीनां मांसानि स्वधर्मं इति मत्वा वृत्यर्थं विक्रीणे, न तु धनलिप्सया ।

**एकपदेन उत्तरत-** **( ½ x2=1 )**

क) कौ मम परायणम् स्तः?

ख) धर्मव्याधः पितरौ किं कृत्वा भोजनं स्वीकरोति?

ग) क: तं मुनिम् अभाषत्?

**पूर्णवाक्येन उत्तरत-** **( 2x1=2 )**

क) धर्मव्याधः कयोः भक्तः आसीत्?

ख) धर्मव्याध: तं मुनिम् किम् अभाषत्?

**भाषिक कार्यम् -** **( 1x2=2 )**

(क) 'अहं तौ स्नापयित्वा स्नामि' इत्यत्र कर्तृपदं किम्?

(ख) 'एतादृशं विज्ञानम्' अत्र विशेष्यपदं किम् ?

(ग) 'ऋषि:' इति पर्यायपदं किं प्रयुक्तम्?

5.

**अधोलिखितं पठित गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत-**

बालः अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं प्रत्यावृत्तः । स जननीम् अपृच्छत् "मातः! क्व आस्ते मम पिता" इति। साऽवदत्- "जात ! तव पिता राजर्षेः जनकस्य सभां विद्वद्भिः सह शास्त्रार्थाय गतः आसीत्, किन्तु अधुना यावत् न प्रतिनिवृत्तः । अहमपि चिन्तातुरा अस्मि।" इदं निशम्य अष्टावक्रः प्रत्यवदत् "जननि ! अलं चिन्तया। श्वः प्रभाते एव अहं राजसभां गत्वा ज्ञास्यामि का वार्ता" इति। माताऽवदत् "त्वं बालोऽसि। राजसभायां तव प्रवेशो न सुलभः । तत्र तव उपहासोऽपि सम्भाव्यते।" विलक्षणप्रतिभासम्पन्नः सर्वशास्त्रपारङ्गतः अष्टावक्रः अभाषत् "मातः! मा भैषीः ईदृशीं तादृशीं वा आशङ्कां मा विधेहि। अहं पित्रा सह क्षिप्रमागमिष्यामि।"

इत्युक्त्वा मात्रा अनुमतः अष्टावक्रः राजसभां गतः । कथमपि सभायां लब्धप्रवेशः स राजानं सविनयं प्राणमत्। तस्य वक्रदेहं वीक्ष्य सभास्थिताः पण्डिताः तारस्वरेण अहसन्।

**एकपदेन उत्तरत-** **( ½ x2=1 )**

(क) अष्टावक्रः कै: सह क्रीडित्वा गृहं प्रत्यावृत्तः?

(ख) मात्रा अनुमत: अष्टावक्र: कुत्र गत:?

(ग) अहं केन सह क्षिप्रमागमिष्यामि?

**पूर्णवाक्येन उत्तरत-** **( 2x1=2 )**

(क) माता अष्टावक्रं किम् अवदत्?

(खं) अष्टावक्र: जननीं किम् अपृच्छत् ?

**भाषिक कार्यम् -** **( 1x2=2 )**

(क) 'अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं प्रत्यावृत्तः' इत्यत्र कर्तृपदं किम् ?

(ख) 'तस्य वक्रदेहं वीक्ष्य सभास्थिताः पण्डिताः तारस्वरेण अहसन्' अत्र विशेष्यपदं किम् अस्ति ?

(ग) 'जनक:' इति किं पर्यायपदं प्रयुक्तम् ?

# उत्तरसंकेता:

## पठितावबोधनम् - 1

**1)** क) नकुलं ख) सर्प: घ) रक्तेन

**2)** क) अविवेकः परमापदां पादम् I, ख) रक्त: विलिप्त: मुख-पादयो: नकुल: ब्राह्मणस्य चरणयोः अलुठत् I

**3)** क) रक्तविलिप्त: ख) बालक:, ग) नकुल:

## पठितावबोधनम् - 2

**1)** क) राजभवने, ख) लालित्यपूर्णा, ग) लक्ष्मीधर:

**2)** क) भोजराज: आत्मानं धन्यं मन्ये I

ख) भोजस्य राज्ये तन्तुवाया: अयस्कारा:, शिल्पिनः, श्रमिका:च अपि ललितां काव्यरचनां कुर्वन्ति I

**3)** क) त्वम्, ख) ललितां, ग) अपरा

## पठितावबोधनम् -3

**1)** क) गृहिणीम् ख) भर्तुः ग) मुने:

**2)** क) मुनिः " एतत् कथमिव ज्ञातमनया" इति चिन्तयन् तत्र उपाविशत् |

ख) सा पतिव्रता गृहिणी मुनिम् अवदत्– "प्रतीक्षस्व क्षणं, यावद् भर्तुः परिचर्यां समापये" इति।

**3)** क) पतिव्रता ख) मुनि: ग) सा

## पठितावबोधनम्-4

**1)** क) मातापितरौ ख) भोजयित्वा ग) धर्मव्याध:

**2)** क) धर्मव्याधः मातापित्रो: भक्तः आसीत् I,

ख) धर्मव्याध: दृष्ट्वा तं मुनिम् अभाषत्- "ब्रह्मन्! किं पतिव्रतया तया इह त्वं प्रेषित:?"

**3)** क) अहम् ख) विज्ञानम्, ग) मुनि:

## पठितावबोधनम्-5

**1)** क) मित्रैः ख) राजसभां ग) पित्रा

**2)** क) साऽवदत्- "जात ! तव पिता राजर्षेः जनकस्य सभां विद्वद्भिः सह शास्त्रार्थाय गतः आसीत्, किन्तु अधुना यावत् न प्रतिनिवृत्तः । अहमपि चिन्तातुरा अस्मि।"

ख) अष्टावक्र: जननीम् अपृच्छत् "मातः! क्व आस्ते मम पिता" इति।

**3)** क) अष्टावक्र: ख) पण्डिताः ग) पिता

# पद्यांशाः

**(1)**

**क्षमा दाता गुणग्राही स्वामी पुण्येन लभ्यते।**
**अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः ॥**

**I. एकपदेन उत्तरत-**

(i) क्षमी दाता गुणग्राही कः पुण्येन लभ्यते?

(ii) अनुकूलः शुचिर्दक्षः क: सुदुर्लभ:?

**II. पूर्णवाक्येन उत्तरत-**

i) कीदृश: कविर्विद्वान् सुदुर्लभः?

ii) कीदृश: स्वामी पुण्येन लभ्यते?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-**

(i) 'प्रतिकूलः' इति पदस्य विपर्ययः कः?

(ii) 'स्वामी पुण्येन लभ्यते' अत्र क्रियापदं प्रयुक्तम्?

**(2)**

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥**

**I. एकपदेन उत्तरत-**

(i) के अन्यस्य छायां कुर्वन्ति?

(ii) वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

**II. पूर्णवाक्येन उत्तरत-**

i) वृक्षाः किमर्थं फलन्ति?

**III. उचितम् उत्तरं चित्वा लिखत-**

(i) 'कुर्वन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'छायायाम्' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

**(3)**

**पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः ।**
**गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते ॥**

**I. एकपदेन उत्तरत-**

(i) वृक्षाः कान् वितन्वते?

(ii) के अस्मभ्यम् पत्रपुष्पफलादीनि ददति?

**II. पूर्णवाक्येन उत्तरत-**

(i) वृक्षाः जनेभ्यो किं-किं यच्छन्ति?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-**

(i) 'सुमनं' इत्यर्थे पद्यांशे किं पदं प्रयुक्तम्?

(ii) अस्मिन् श्लोके कर्तृपदं किम् अस्ति ?

## (4)

**मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः ।**
**नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात् ॥**

**I. एकपदेन उत्तरत-**

(i) चन्दनपादपस्य शाखा कैः आश्रिता?

(ii) चन्दनपादपस्य शिखरं कैः आश्रितम् ?

**II. पूर्णवाक्येन उत्तरत-**

(i) कस्य भागाः कैः समन्तात् आश्रिताः?

**III. निर्देशानुसारम् उत्तरत-**

(i) वानरैः इत्यर्थे किं पदमत्र प्रयुक्तम्?

(ii) 'अस्ति' इत्यस्य कर्तृपदम् किम् ?

## (5)

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥ 1॥**

**I. एकपदेन उत्तरत-**

(i) प्रस्तरखण्डेषु कैः रत्नसंज्ञा विधीयते?

(ii) पृथिव्यां कति रत्नानि?

**II. पूर्णवाक्येन उत्तरत-**

(i) पृथिव्यां त्रीणि रत्नानि कानि सन्ति? तेषां नामानि लिखत I

**III. भाषिककार्यम्-**

(1) 'प्राज्ञैः' इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत-

(2) 'सलिल:' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

## (6)

**कल्पद्रुमः कल्पितमेव सूते, सा कामधुक् कामितमेव दोग्धि।**
**चिन्तामणिश्चिन्तितमेव दत्ते, सतां हि सङ्गः सकलं प्रसूते॥ 2॥**

**I. एकपदेन उत्तरत-**

(i) कल्पितमेव कः सूते?

(ii) का कामितमेव दोग्धि?

**II. पूर्णवाक्येन उत्तरत-**

(i) चिन्तामणिः किम् दत्ते?

**III. भाषिककार्यम्-**

(1) 'वृक्षः' इत्यर्थे किं पदं प्रयुक्तम्?

(2) 'सतां हि सङ्गः सकलं प्रसूते' अत्र क्रियापदं किम्?

**(7)**

**गच्छन् पिपीलको याति योजनानां शतान्यपि।**
**अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥ 3॥**

**I. एकपदेन उत्तरत-**

(i) कः गच्छन् योजनानां शतान्यपि गच्छति?

(ii) अगच्छन् कः पदमपि न गच्छति?

**II. पूर्णवाक्येन उत्तरत-**

(i) गच्छन् पिपीलकः कति योजनानि गच्छति?

**III. निर्देशानुसारम् उत्तरत-**

(क) अस्मिन श्लोके 'गरुड़; इत्स्य किं पर्यायपदं प्रयुक्तम्?

(ख) 'गच्छन् पिपीलको याति' अत्र क्रियापदं किम् अस्ति ?

**(8)**

**शोको नाशयते धैर्यं, शोको नाशयते श्रुतम् ।**
**शोको नाशयते सर्वं, नास्ति शोकसमो रिपुः ॥ 4॥**

**I. एकपदेन उत्तरत-**

(i) सर्वं कः नाशयते?

(ii) शोकसम: कः न अस्ति?

**II. पूर्णवाक्येन उत्तरत-**

(i) केन समं रिपुः न अस्ति?

**III. निर्देशानुसारं लिखत-**

(i) 'मित्रम्' इति पदस्य विलोमपदं किम् प्रयुक्तम् ?

(ii) ' शोको नाशयते धैर्यं '-अत्र क्रियापदं किम् ?

**(9)**

**काष्ठादग्निर्जायते मथ्यमानाद्**
**भूमिस्तोयं खन्यमाना ददाति ।**
**सोत्साहानां नास्त्यसाध्यं नराणां**
**मार्गारब्धाः सर्वयत्नाः फलन्ति ॥**

**1. एकपदेन उत्तरत-**

(i) तोयम् का ददाति?

(ii) मथ्यमानाद् काष्ठात् कः जायते?

**II. पूर्णवाक्येन उत्तरत-**

(i) सर्वप्रयत्नाः कीदृशाः फलन्ति?

**III. निर्देशानुसारं लिखत-**

(i) 'अग्नि:' इति कर्तृपदस्य क्रियापदं किम्?

(ii) 'अनलः' इति पदस्य पर्यायपदं श्लोके किं प्रयुक्तम् ?

**(10)**

**ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो**
**ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ।**
**अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ 10 ॥**

**1. एकपदेन उत्तरत-**

(i) ऐश्वर्यस्य विभूषणं किम् अस्ति ?

(ii) क्षमा केषां विभूषणम् ?

**II. पूर्णवाक्येन उत्तरत-**

परं भूषणं किम् अस्ति?

**III. निर्देशानुसारम् उत्तराणि लिखत -**

(i) 'आयः' इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(ii) ' शीलं परं' अत्र  विशेष्यपदम् किं प्रयुक्तम्?

## उत्तरसंकेत-पद्यांशाः

**उत्तराणि-1**

1. (i) स्वामी (ii) कविर्विद्वान्

II. (i) अनुकूलः शुचिः दक्षः कविः विद्वान् सुलभः न अस्ति।
(ii) क्षमा दाता गुणग्राही स्वामी पुण्येन लभ्यते।

III. (i) अनुकूलः । (ii) लभ्यते

**उत्तराणि-2**

I. (i) वृक्षाः (ii) आतपे

II. (i) वृक्षाः परार्थाय फलन्ति।

III. (i) वृक्षाः (ii) आतपे

**उत्तराणि-3**

1. (i) कामान् (ii) वृक्षाः।

II. (i) वृक्षाः जनेभ्यो पत्रं, पुष्पं, फलं, छाया, मूलं वल्कलं दारू, गन्ध, निर्यासः, भस्म, अस्थिः, तोक्य च यच्छन्ति।

III. (i) पुष्पं। (ii) वितन्वते

**उत्तराणि-4**

1. (i) विहङ्गैः (ii) प्लवङ्गैः।

II. (i) चन्दनपादपस्य भागाः सत्त्वभरैः आश्रिताः।

III. (i) प्लवङ्गैः (ii) तत् चन्दनम्

**उत्तराणि-5**

I. (i) मूढैः (ii) त्रीणि

II. (i) पृथिव्यां त्रीणि रत्नानि-जलम्, अन्नम्, सुभाषितम् च सन्ति।

III. (1) मूढैः (2) जलम्

**उत्तराणि-6**

I. (i) कल्पद्रुमः (ii) कामधुक्

II. (i) चिन्तामणिः चिन्तितमेव दत्ते।

III. (1) द्रुमः (2) प्रसूते

**उत्तराणि-7**

I. (1) पिपीलकः (ii) वैनतेयः

II. (i) गच्छन् पिपीलकः शतान्यपि योजनानां गच्छति।

III. (क) वैनतेय: (ख) याति

**उत्तराणि-8**

I. (i) शोकः (ii) रिपुः

II. (i) शोकसमं रिपुः नास्ति ।

III. (i) रिपुः (ii) नाशयते

**उत्तराणि-9**

I. (i) भूमिः (ii) अग्निः

II. (i) मार्गारब्धाः सर्वप्रयत्नाः फलन्ति।

III. (i) जायते (ii) अग्निः।

**उत्तराणि-10**

1. (i) सुजनता (ii) बलवतां

II. (i) शीलम् परं भूषणम् अस्ति।

III. (i) व्ययः (ii) शीलम्

# नाट्यांशाः

**(क)**

(धारानगर्यां भोजराजस्य राजसभा। सर्वे अमात्याः कर्मचारिणः च यथास्थानम् आसनानि अध्यासते)

(प्रविश्य)

**द्वारपालः** जयतु देवः। द्रविडदेशीयः लक्ष्मीधरनामा कश्चिद् विद्वान् देवस्य दर्शनार्थं द्वारदेशम् अध्यास्ते ।

**भोजः** सादरं प्रवेशय।

**द्वारपालः** यथा आदिशति देवः (निष्क्रान्तः)

**लक्ष्मीधरः** (द्वारपालेन सह प्रविश्य), राजन्। अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु। वर्धन्तां विभवाः सौख्यानि च। लसन्तु सम्पदः, विलयं व्रजन्तु च विपदः। प्रतिष्ठां लभतां विद्वद्गणः। सततम् एधतां विद्यासु कलासु व भवदनुरागः।

**I. एकपदेन उत्तरत-**

(i) लक्ष्मीधरनामविद्वान् कुत्र अध्यास्ते?

(ii) नृपस्य कीर्तिः कथं दिक्षु प्रसारम् आप्नोतु?

**II. पूर्णवाक्येन उत्तरत-**

(i) के यथास्थानम् आसनानि अध्यास्ते?

**III. भाषिककार्यम्-**

(i) 'सर्वे अमात्याः' एतयोः पदयोः विशेष्यः कः?

(ii) 'विपदः' पदस्य विपर्ययः नाट्यांशात् एव चित्वा लिखत।

**(ख)**

**भोजः** अनुगृहीतोऽस्मि । कुतः समागमनम् अत्रभवताम् ?

**लक्ष्मीधरः** राजन् ! यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयम् समायान्ति । अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि । भवद्राज्ये निवस्तुम् इच्छामि।

**भोजः** ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर ! नगरपालं समाहूय आदिश्यतां यत् सः लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एषः पण्डितवरः वासयितव्यः ।

**I. एकपदेन उत्तरत-**

(i) भोजस्य सभायां कः समागतः?

(ii) लक्ष्मीधर: कुत्र निवस्तुम् इच्छति ?

**II. पूर्णवाक्येन उत्तरत-**

(i) भोजः नगरपालं समाहूय किम् आदेष्टुम् अकथयत् ?

**III. निर्देशानुसारं लिखत-**

(i) 'जलपूर्णं सरः भवति'-अत्र क्रियापदं किम् ?

(ii) 'तड़ागः' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

**(ग)**

**नगरपालः** (प्रविश्य) महाराज! आनीतोऽयं कुविन्दः। अयं काव्यं कर्तुं न जानाति।

**भोजराजः** (कुविन्दं प्रति) भोः त्वं काव्यं कर्तुं न जानीषे। अतः राजकोषात् धनं गृहीत्वा क्वचिदन्यत्र प्रस्थानं कुरु। तव गृहे एष पण्डितवरः सकुटुम्बः स्थास्यति।

**तन्तुवायः** राजन्! राजनियमः तु मया पालनीयः एव तथापि श्रूयतां मम एकं निवेदनम्।

**भोजराजः** त्वरितं ब्रूहि!

**तन्तुवायः** महाराज! तन्तुवयनं मम व्यवसायः। अहं रात्रिन्दिवं परिश्रम्य अनेन व्यवसायेन जीविकामर्जयामि। काव्यरचनायां महाकवितुल्यः मम अभ्यासः नास्ति तथापि किञ्चित् निवेदयामि।

**I. एकपदेन उत्तरत-**

(i) तन्तुवयनं कस्य व्यवसायं अस्ति?

(ii) राजनियमाः केन पालनीयाः?

**II. पूर्णवाक्येन उत्तरत-**

(i) तन्तुवायः कथम् जीविकाम् अर्जयति?

**III. निर्देशानुसारं लिखत-**

(i) 'जानीषे' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'शीघ्रं' इत्यर्थे किं पदं प्रयुक्तम्?

**(घ)**

**प्रतापः** धिङ् माम् अधन्यम् योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घं निःश्वसिति) (यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः)

**राजपुत्रः** (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम्।

**प्रतापः** (समाश्वस्य) अयि भ्रातः! कथं जयघोषं कृत्वा मां लज्जयसे ?

**राजपुत्रः** देव! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय ? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम्? विजेष्यते ननु भवान्!

**प्रतापः** कुतस्तावद् विजयः! स्वदेशमेव त्यक्तुं तत्परोऽहम् I

**भटः** (अञ्जलिं बद्ध्वा) महाराज! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः।

**I. एकपदेन उत्तरत-**

(i) स्वदेशं त्यक्तुं तत्परः कः आसीत्?

(ii) के प्रतापस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति?

**II. पूर्णवाक्येन उत्तरत-**

(i) भटः अञ्जलिं बद्ध्वा प्रतापं प्रति किं वदति ?

**III. शुद्धम् उत्तरं चित्वा लिखत-**

(i) 'कथं भवान् वदसि?'अत्र क्रियापदं किम् ?

(ii) 'वीक्ष्य' इति पदस्य समानार्थकं पदं चित्वा लिखतI

**(ङ)**

**प्रथमः भिल्लः** हा धिक! कीदृशः समय: आगतः। देशभक्तः प्रतापोऽपि स्ववेशं परित्यज्य अन्यत्र प्रस्थितः।

**द्वितीयः भिल्लः** न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम् ? हा निष्ठुर दैव! देशभक्ते तु दयस्व।

**तृतीयः भिल्लः** वराकोऽयं जीवनसामग्रीयुद्धसामग्र्योः अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः ?
(सर्वे भिल्लाः विलपन्ति)

**एकः सैनिकः** हा दैव! कथं देशधर्मौ प्रति निष्ठुर: सञ्जातोऽसि ? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम् ।

**सर्वे सैनिकाः** परतन्त्रे देशे जीवनं नरकायते। न शक्नुमः प्राणान् धारयितुम्।
(सर्वे आत्मानं हन्तुमुद्यताः)
(एतद् दृश्यं दृष्ट्वा तत्रत्याः भिल्लाः अपि मरणाय तत्पराः भवन्ति।)

**I. एकपदेन उत्तरत-**

(i) सर्वे के विलपन्ति?

(ii) कीदृशे देशे जीवनं नरकायते ?

**II. पूर्णवाक्येन उत्तरत-**

(i) के मरणाय तत्पराः भवन्ति?

**III. शुद्धम् उत्तरं चित्वा लिखत-**

(i) 'भिल्लाः अपि मरणाय तत्पराः भवन्ति' अत्र किं क्रियापदम् ?

(ii) 'सर्वे भिल्लाः विलपन्ति' अत्र विशेषणपदं किं प्रयुक्तम्?

# उत्तरसंकेतः

## उत्तरमाला (क)

I. (i) द्वारदेशम् (ii) दिनकर-दीप्तिरिव

II. (i) सर्वे अमात्याः कर्मचारिणः च यथास्थानम् आसनानि अध्यास्ते।

III. (i) अमात्याः (ii) विपदः

## उत्तरमाला (ख)

I. (i) लक्ष्मीधरः (ii) भवद्राज्ये

II. (i) भोजः नगरपालं समाहूय आदिश्यताम् यत् सः लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु।

III. (i) भवति (ii) सर:

## उत्तरमाला (ग)

I. (i) कुविन्दस्य (ii) तन्तुवायेन ।

II. (i) तन्तुवायः रात्रिन्दिवं परिश्रम्य तन्तुवयेन जीविकाम् अर्जयति ।

III. (i) त्वम्। (ii) त्वरितं

## उत्तरमाला (घ)

1. (i) प्रतापः (ii) सहचराः

II. (i) भटः अञ्जलिं बद्ध्वा प्रतापं प्रति वदति यत् ते स्वामिभाग्यानाम् अनुगन्तारः सन्ति। ते सर्वे अपि प्रतापम् अनुगमिष्यन्ति ।

III. (i) वदसि (ii) दृष्ट्वा

## उत्तरमाला (ङ)

I. (i) भिल्लाः (ii) परतन्त्रे

II. (i) भिल्लाः मरणाय तत्पराः भवन्ति।

III. (i) भवन्ति (ii) सर्वे.

# **प्रश्ननिर्माणम् (5)**

**1. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

**(1)** तत् आकर्ण्य स **मुनिः** विस्मितः **।**

(क) के (ख) किम् (ग) कः (घ) कस्य

**(2) भर्तृसेवायाः** अपरः धर्मः नास्ति।

(क) केभ्यः (ख) केभ्यः (ग) कस्याः (घ) कानि

**(3)** नाहं बलाकेति **गृहिण्या** कथितम्।

(क) कया (ख) केषाम् (ग) कस्मात् (घ) कस्य

**(4) बालकस्य** माता गृहे आसीत्।

(क) कः (ख) कया (ग) कस्य (घ) किं

**(5) सूर्योदयात्** पूर्वमेव बालिका तत्रोपस्थिता।

(क) कः (ख) कस्मात् (ग) कुत्र (घ) कानि

(6) राजन्! **भवन्तम्** अभिवादये ।

(क) कम् (ख) किम् (ग) कः (घ) काम्

(7) **धारानगर्यां** भोजराजस्य राजसभा भवति ।

(क) कयाम् (ख) केषाम् (ग) कस्मात् (घ) कस्याम्

(8) अहं **पित्रा** सह क्षिप्रं आगमिष्यामि ।

(क) कः (ख) कया (ग) केन (घ) किं

**2. रेखाङ्कित-पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

(क) **अविवेकः** परमापदां पदं भवति ।

(ख) **फलोद्गमैः** तरवः नम्राः भवन्ति ।

(ग) **देशभक्तः** प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः ।

(घ) एकः चन्द्रः **तमः** हन्ति ।

(ङ) मुनिः **गृहिणीं** भिक्षाम् अयाचत ।

(च) धर्मव्याधः **मातापित्रोः** भक्तः आसीत् ।

(छ) **परतन्त्रे** देशे जीवनं नरकायते।

(ज) **भटाः** देशरक्षार्थं बद्धपरिकराः आसन्।

(झ) **प्रतापं** निराशं दृष्ट्वा भिल्लाः दुखीयन्ति।

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत |**

(क) अष्टावक्रः **मिथ्याज्ञानगर्वितान्** दृष्ट्वा हसति ।

(ख) **राज्ञा** हास्यकारणं पृष्टम्।

(ग) अष्टावक्रः **पितरम्** आदाय क्षिप्रम् आगमिष्यति ।

(घ) **मात्रा** अनुज्ञातः स राजसभां गतः ।

(ङ) **पण्डितानां** चेष्टितं दृष्ट्वा अष्टावक्रः हसितुमारभत ।

**4. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

(i) पर्यावरणरक्षणमपि **धर्मस्य** एव अङ्गम् अस्ति ।

(ii) प्राचीनकाले **ऋषयः** वने निवसन्ति स्म।

(iii) **पुरुषार्थैः** एव लक्ष्यं प्राप्यते ।

(iv) **जगति** मूर्खाणाम् अभावः नास्ति ।

(v) मरालैः सह विप्रयोगः **सरोवराणां** हानिः अस्ति ।

# उत्तरसंकेतः

**1.**

| | | | |
|---|---|---|---|
| **(1)** (ग) कः | **(2)** (ग) कस्याः | **(3)** (क) कया | **(4)**(ग) कस्य |
| **(5)** (ख) कस्मात् | **(6)** (क) कम् | **(7)** (घ) कस्याम् | **(8)** (ग) केन |

**2.** (क) **कः** परमापदां पदं भवति ?

(ख) **कैः** तरवः नम्राः भवन्ति ?

(ग) **कीदृशः** प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः ?

(घ) एकः चन्द्रः **किं** हन्ति ?

(ङ) मुनिः **कां** भिक्षाम् अयाचत ?

(च) धर्मव्याधः **कयोः** भक्तः आसीत् ?

(छ) **कीदृशे** देशे जीवनं नरकायते |

(ज) **के** देशरक्षार्थं बद्धपरिकराः आसन्।

(झ) **कं** निराशं दृष्ट्वा भिल्लाः दुखीयन्ति ।

**3.** (क) कान्   (ख) केन   (ग) कम्   (घ) कया   (ङ) केषाम्

**4.** (i) कस्य   (ii) के   (iii) कैः   (iv) कुत्र   (v) केषाम्

# अन्वयः (2)

## (1)

- **मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत-**

**स जातो येन जातेन याति वंशः समुन्नतिम् ।**
**परिवर्तिनि संसारे मृतः को वा न जायते ।।**

**अन्वयः :-**

येन जातेन ( **i** ) ......... समुन्नतिम् याति सः (एव) ( **ii** ) ........... (अस्ति)
(अस्मिन्) ( **iii** ) .............. संसारे कः मृतः (कः) वा न ( **iv** ) ........... ?

**मञ्जूषा**

| |
|---|
| वंशः, जातः, परिवर्तिनि, जायते |

## (2)

**अहो ! एषां वरं जन्म सर्वप्राण्युपजीवनम् ।**
**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ।।**

**अन्वयः :-**

अहो! सर्व ( **i** ) ......... एषां जन्म ( **ii** ) ........... | महीरुहाः **(iii)** ..............
येभ्यः **(iv)** ........... निराशाः न यान्ति |

**मञ्जूषा**

| |
|---|
| अर्थिनः, वरम्, प्राण्युपजीवनम्, धन्याः |

## (3)

**तस्य तीक्ष्णनखाभ्याम् तु चरणाभ्याम् महाबलः ।**
**चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।**

**अन्वयः:-**

महाबलः (i)---------------- (जटायुः) तु (ii)--------------चरणाभ्याम् तस्य
(iii)--------------- बहुधा (iv)---------------- चकार|

**मञ्जूषा**

| |
|---|
| तीक्ष्णनखाभ्याम्, व्रणान्, पतगसत्तमः, गात्रे |

## (4)

**निम्ब! त्वदीयकटुता यदि दाहहन्त्री, गायन्तु मूढमनुजास्तव दोषगाथाः।**
**तप्तास्त एव तपनोपमपित्ततापैः गास्यन्ति मित्रवर! तावकगीतकानि ।।**

**अन्वयः-**

निम्ब! यदि (i) ---------------- दाहहन्त्री, मूढमनुजा: तव (ii) -------------------
गायन्तु। मित्रवर! ते एव (iii) ------------------ तप्ता: (iv) -------------------- गास्यन्ति ।

**मञ्जूषा**

| तपनोपमपित्ततापैः, त्वदीय-कटुता, दोषगाथाः, तावकगीतकानि |
|---|

## (5)

**जटायो पश्य मामार्य ह्रियमाणमनाथवत् ।**
**अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा ।।**

**अन्वयः** –

आर्य .................... (i) ! अनेन ....................... (ii) राक्षसेन्द्रेण अकरुणम् ..........................
(iii) ह्रियमाणम् .......................... (iv) पश्य ।

**मञ्जूषा**

| माम्, जटायो, अनाथवत्, पापकर्मणा |
|---|

## (6)

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः ॥

**अन्वयः-**

नद्य: (i) …………….. अम्भः न पिबन्ति, वृक्षा: स्वयं (ii) …………….. न खादन्ति । खलु
(iii) …………………..सस्यं नादन्ति सतां (iv) …………..….. परोपकाराय (एव भवन्ति) ।

**मञ्जूषा**

| स्वयमेव, वारिवाहाः, विभूतयः फलानि |
|---|

# उत्तरसंकेतः

## अन्वयः

### (1)

येन जातेन ( **i** ) **वंशः** समुन्नतिम् याति सः ( एव ) ( **ii** ) **जातः** ( अस्ति ) (अस्मिन् ) ( **iii** ) **परिवर्तिनि** संसारे कः मृतः ( कः ) वा न ( **iv** ) **जायते** ?

### (2)

( **i** ) प्राण्युपजीवनम्   ( **ii** ) वरं   (**iii**) धन्या:   (**iv**) अर्थिन:

### (3)

(I) पतगसत्तम:   (II) तीक्ष्णनखाभ्याम्   (III) गात्रे   (IV) व्रणान् |

### (4)

(i) त्वदीय-कटुता   (ii) दोषगाथा:   (iii) तपनोपमपित्ततापै:   (iv) तावकगीतकानि

### (5)

(i) जटायो   ii) पापकर्मणा   (iii) अनाथवत्   (iv) माम्

### (6)

(i) स्वयमेव   (ii) फलानि   (iii) वारिवाहाः   (iv) विभूतयः

# भावार्थः

## (1)

- **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे|**
**फ़लान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ||**

**भावार्थः -**

अस्मिन् लोके यथा (1) _________ परस्य कृते उपकारं कुर्वन्ति तथा एव (2) __________ अन्यस्य कृते (3) _______________ कुर्वन्ति एवं स्वयम् आतपे तिष्ठन्ति | स्वयम् (4) ________ न खादन्ति अपितु परार्थाय एव यच्छन्ति |

**मञ्जूषा-**

| फ़लानि, सत्पुरुषाः, छायां , वृक्षाः |
|---|

## (2)

**वृत्तं यत्नेन संरक्षेद् वित्तमायाति च याति च ।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।**

**भावार्थः –**

अस्माकं जीवने आचरणं सर्वोपरि अस्ति अतः आचरणस्य रक्षा कुर्यात् (i) ---------------- तु आगच्छति गच्छति वा, परन्तु यदि आचरणं (ii) ------------------- अभवत् तर्हि मानवः (iii) -------------------- एव अस्ति। पुरुषः स्वजीवनं सफलं समृद्धं च निर्मापयितुं (iv) --------------------- विशिष्टम् अवधानं दद्यात्।

**मञ्जूषा**

| आचरणे, क्षीणो, धनम्, नष्टम् |
|---|

## (3)

**कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः ।**
**अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ।।**

**भावार्थः-**

अस्य श्लोकस्य भावः अस्ति यत् (i) ----------------------- प्रभावः सर्वत्र दृश्यते। यथा कीटः सुमनः (ii) ----------------------- सतां शिरः आरोहति (iii) -------------------------- सज्जनैः संगत्या अश्मापि (iv) --------------------------- प्राप्नोति।

**मञ्जूषा-**

| देवत्वम्, सत्संगत्याः, तथैव, सङ्गात् |
|---|

## (4)

**अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम् ।**
**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ॥**

**भावार्थः :-**

अस्य श्लोकस्य भावः अस्ति यत् अहो! एषाम् सर्व- (1) .......... उपजीवनम् जन्म (2) ............ अर्थात् श्रेष्ठमेव अस्ति | अथ च एते महीरुहा: अपि ( 3 ) ........... अर्थात् श्रेष्ठताभजिनः यतोहि एतेभ्यः वृक्षेभ्यः अर्थिन: निराशा: न ( 4 ) ........ |

**मञ्जूषा**

| |
|---|
| प्राणिनाम् , वरम्, यान्ति, धन्या: |

## (5)

**पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः ।**
**गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते॥**

**भावार्थः**

वृक्षाः पत्रैः, (1)................., फलैः, छायया, मूलैः, वल्कलैः, दारुभिः च (2)................... उपयोगाय सेवां कुर्वन्ति। ते गन्धेन, (3)..................., भस्मना, अस्थिभिः च उपयोगीयं वस्तुं प्रददन्ति। एवं ते सर्वैः (4)................. मनुष्याणां कामान् पूर्णं कुर्वन्ति।

**मञ्जूषा**

| |
|---|
| मनुष्याणां, पुष्पैः, निर्यासेन, साधनैः |

# उत्तरसंकेतः

# भावार्थः

**(1).** अस्मिन् लोके यथा (1) **सत्पुरुषा:** परस्य कृते उपकारं कुर्वन्ति तथा एव (2) **वृक्षाः** अन्यस्य कृते (3) **छायां** कुर्वन्ति एवं स्वयम् आतपे तिष्ठन्ति | स्वयम् (4) **फ़लानि** न खादन्ति अपितु परार्थाय एव यच्छन्ति |

**(2).** (i) धनम् (ii) नष्टम् (iii) क्षीणो (iv) आचरणे

**(3).** (i) सत्संगत्याः (ii) सङ्गात् (iii) तथैव (iv) देवत्वम्

**(4).** (i) प्राणिनाम् (ii) वरम् (iii) धन्या: (iv) यान्ति

**(5).** (i) पुष्पैः (ii) मनुष्याणां (iii) निर्यासेन (iv) साधनैः

# प्रसंगानुसारम् अर्थचयनम् (4)

**1. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**

( i ) तत् मह्यम् **अर्पय** ।

( क ) स्वीकुरु ( ख ) निरीक्ष्य ( ग ) देहि ( घ ) इच्छति

( ii ) त्वं **भूयः** नगरं याहि ।

( क ) पुन: ( ख ) त्वरितं ( ग ) एकदा ( घ ) शीघ्रं

( iii ) धनसेनयो: अभावे देशरक्षणाय **पर्याकुला:** स्म ।

( क ) परित्यक्ता: ( ख ) विकला: ( ग ) परितृप्ता: ( घ ) विफलाः

( iv ) मदीयेन एव खड्गेन **जहि** माम् ।

( क ) वद ( ख ) त्यज ( ग ) वधं कुरु ( घ ) त्यागं कुरु

( v ) **क्षिप्रम्** अक्रियमाणस्य तद् रसम् कालः पिबति ।

( क ) अधुना ( ख ) सम्प्रति ( ग ) शीघ्रम् ( घ ) विक्षुब्धः

2. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -**

**( i )** एकदा सः मुनिः **तरु** - छायायाम् उपविष्टः आसीत् ।

**(** क ) मन्दिर ( ख ) वृक्ष **(** ग ) मेघ ( घ ) भवन

**( ii )** सुदर्शनः तस्य विष्णुशर्मणः **करे** बहुमानपुरः सरं पुत्रान् समर्पितवान् ।

**(** क ) ग्रामे ( ख ) क्रोडे **(** ग ) शिरसि ( घ ) हस्ते

**( iii )** अहं मातृभूमिं **रक्षितुम्** असमर्थः ।

**(** क ) रक्षणाय ( ख ) भक्षणाय **(** ग ) जीवनाय ( घ ) आनन्दाय

**( iv )** भूमिः **तोयं** खन्यमाना ददाति ।

**(** क ) अग्निं ( ख ) वायुं **(** ग ) जलं ( घ ) आकाशं

**( v )** **सहसा** विदधीत न क्रियाम् ।

**(** क ) सह ( ख ) अपि **(** ग ) पुनः ( घ ) अकस्मात्

**3. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**

1. मल्लिके! **सत्वरम्** आगच्छ ।

क. विलम्बेन ख.शीघ्रम्

ग. समयेन घ. अलस:

2. प्राणिन: एव मम **वयस्या**: सन्तु ।

क. मित्राणि ख. शत्रव:

ग. वृद्धा: घ. युवान:

3. **स्वादूनि** भक्ष्यकवलानि ते दास्यामि।

क. तिक्तानि | ख. स्वादिष्टानि

ग. कषाययुतानि | घ. लावणिकानि

4. **प्रीतो** बाल तम् इत्थम् सम्बोधयत्

क. खिन्नः | ख. लुब्धः

ग. निर्दयी | घ. प्रसन्नः

5. स्वबाल- **अपत्यस्य** रक्षार्थं विप्रं व्यवस्थाप्य गता।

क. अपुत्रस्यः | ख. भागिनेयस्य

ग. पत्युः | घ. सन्ततेः

**4. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**

(क) येन त्वं कुलानुरूपम् **उद्धतः** असि।

(i) उद्दण्डः (ii) परोपकारी

(iii) तत्परः (iv) सेवकः

(ख) सः पितुः **सकाशम्** आगच्छत्।

(i) शीघ्रम् (ii) समीपम्

(iii) उपेत्य (iv) दूरम्

(ग) सः पुत्रः आचार्यम् **उपेत्य** अपठत्।

(i) दूरं गत्वा (ii) भवनं गत्वा

(iii) समीपं गत्वा (iv) गृहं गत्वा

(घ) एवम् **अणिम्नः** स्थूलं जगत् उद्भवति।

(i) विशालात् (ii) सूक्ष्मात्

(iii) स्थूलात् (iv) दुर्बलात्

(ङ) एषु एकं बीजं **भिन्धि**।

(i) खादय (ii) त्रोटय

(iii) पालय (iv) यच्छ

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत-**

(i) तपोदत्तः सर्वैः कुटुम्बिभिः **गर्हितः** अभवत्।

(क) मूर्छितः (ख) गृहीतः (ग) निन्दितः (घ) हर्षितः

(ii) **सरितो** गिरिनिर्झराः अमृतस्वादु-निर्मलं जलं प्रयच्छन्ति।

(क) स्त्रीयः (ख) नद्यः (ग) सिकताः (घ) अत्यधिकम्

(iii) अयि **वाणि**! नवीनां वीणां निनादय।

(क) गणेश (ख) पार्वति (ग) राधा (घ) सरस्वति

(iv) लतानां नितान्तं शान्तिशीलं **<u>सुमं</u>** चलेत् ।

(क) पुष्पम् (ख) शोभनम् (ग) सुमधुरम् (घ) मन्दिरम्

(v) अहं क्रीडसहायं त्वाम् एव **<u>अनुरूपं</u>** पश्यामि।

(क) स्वामी (ख) अयोग्यम् (ग) योग्यम् (घ) अपरम्

# उत्तरसंकेतः

## प्रसंगानुसारम् अर्थचयनम्

**1.** ( i ) ( ग ) देहि ( ii ) ( क ) पुन: ( iii ) ( ख ) विकला:

( iv ) ( ग ) वधं कुरु ( v ) ( ग ) शीघ्रम्

2. **( i )** (ख) वृक्ष **( ii )** ( घ ) हस्ते **( iii )** (क) रक्षणाय

**( iv) (** ग ) जलं **( v )** ( ग ) अकस्मात्

**3.** 1. ख.शीघ्रम् 2. क. मित्राणि 3. ख. स्वादिष्टानि

4. घ. प्रसन्न: 5. घ. सन्ततेः

**4.** (क) (i) उद्दण्डः (ख) (ii) समीपम् (ग) (iii) समीपं गत्वा

(घ) (ii) सूक्ष्मात् (ङ) (ii) त्रोटय

**5.** (i) (ग) निन्दितः (ii) (ख) नद्यः (iii) (घ) सरस्वति

(iv) (क) पुष्पम् (v) (ग) योग्यम्

# पाठाधारित- कथापूर्तिः

**1. पाठाधारेण- मञ्जूषा-पद-सहायतया कथायां रिक्तस्थानपूर्तिः कुरुत-**

अस्ति (i) -------------- तीरे पाटलिपुत्रनामधेयं (ii) ---------------- | तत्र सर्वस्वामिगुणोपेतः (iii) ---------- नाम नरपतिः आसीत् | स (iv) ------------ एकदा पठ्यमानं श्लोकद्वयं (v) ------- | अत्रान्तरे विष्णुशर्मनामा (vi)------------------सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अवदत्-देव! महाकुलसम्भूता एते राजपुत्राः, तत् मया नीतिं ग्राहयितुं शक्यन्तेI' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् (vii) ---------------- | राजा (viii) ------------ पुनरवदत् - कोऽत्र सन्देहः ?

**मञ्जूषा-**

| |
|---|
| नगरम्, सुदर्शनः, करिष्यामि, श्रुतवान्, भागीरथी , सविनयं, भूपतिः, महापण्डितः, |

**2. मञ्जूषातः उचितपदानि चित्वा कथापूर्तिं च कृत्वा कथां पुनः उत्तरपुस्तिकायां लिखत**

एकदा महर्षि: **(i)**______________________ स्वपुत्रं श्वेतकेतुं विद्याध्ययनार्थं गन्तुम् अकथयत् | तदा श्वेतकेतु: गुरोः समीपं गत्वा **(ii)**_________________ यावत् विद्याम् अधीतवान् | पश्चात् स: सर्वान् **(iii)**____________________ सार्थान् अधीत्य पितुः समीपम् आगच्छत् | स: विद्याध्ययनार्थम् आत्मानं सर्वश्रेष्ठ: **(iv)**____________________ इति मन्यमान: उद्धतस्वभावोऽभवत् | तमेवं दृष्ट्वा पिता **(v)**___________________ अपृच्छत् – पुत्र त्वया क: **(vi)**_____________ प्राप्त: येन त्वं कुलविपरीतम् उद्धत: असि **?** किं **(vii)**__________________ जानासि येन ज्ञातेन सर्वं अज्ञातम् अपि **(viii)**______________________ भवति |

**मञ्जूषा-**

| |
|---|
| वेदान्, अहम्, पुत्रम् , तत्, अतिशयः, आरुणिः, ज्ञातम् , द्वादशवर्षाणि |

**3. पाठाधारितां कथाम् इमां पठित्वा मञ्जूषा-प्रदत्त-पदसहायतया रिक्तस्थानानि पूरयत-**

एकदा अयं मुनिः क्वापि (1) --------------- एकं ब्राह्मणगृहम् प्राप्य तद्गृहिणीम् (2) ----------------- अयाचत। सा पतिव्रता गृहिणी तमवदत्- "प्रतीक्षस्व क्षणं, यावत् भर्तुः (3) ------------------ समापये" इति। एतत् श्रुत्वा स मुनिः तां (4) ---------------- दृष्टवान्। सा विहस्य अभाषत-"मुने! न अहं बलाकेति। तत् आकर्ण्य (5) ----------------- मुनिः "एतत् कथमिव ज्ञातमनया" इति चिन्तयन् तत्र उपाविशत्। ततश्च सा साध्वी भर्तुः (6) ------------------- कृत्वा भिक्षाम् आदाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत्-"कथं त्वया अनन्यगोचरो (7) ------------------ ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।" साऽवदत्-"मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे (8) ------------ --------विज्ञानम् ।

| |
|---|
| विस्मितः, भिक्षाम्, शुश्रूषां, कोपदृष्ट्या, बलाकावृत्तान्तो, नगरे, एतादृशं, परिचर्यां, |

# उत्तरसंकेतः
# पाठाधारित- कथापूर्तिः

**1.** (i) भागीरथी (ii) नगरम् (iii) सुदर्शनः (iv) भूपतिः
(v) श्रुतवान् (vi) महापण्डितः (vii) करिष्यामि (viii) सविनयं

**2.** (1) आरुणिः (2) द्वादशवर्षाणि (**3**) वेदान् (**4**) अहम्
(**5**) पुत्रम् (**6**) अतिशय: (**7**) तत् (**8**) ज्ञातम्

**3.** (1) नगरे (2) भिक्षाम् (3) परिचर्यां (4) कोपदृष्ट्या
(5) विस्मितः (6) शुश्रूषां (7) बलाकावृत्तान्तो (8) एतादृशं

# प्रतिदर्श-प्रश्नपत्रम्

## कक्षा-नवमी

## विषयः- संस्कृतम् (119) संप्रेषणात्मकम्

**अवधिः -3.00 घण्टा** **पूर्णाङ्काः-80**

**सामान्य निर्देशाः -**

1. उत्तरलेखनात् पूर्वं प्रश्नपत्रे अनुक्रमाङ्कः अवश्यं लेखनीयः |

**प्रश्न पत्रस्य स्वरूपम्**

| | | |
|---|---|---|
| अपठित- अवबोधनम् | - | 10 अंकाः |
| रचनात्मक – कार्यम् | - | 15 अंकाः |
| अनुप्रयुक्त व्याकरणम् | - | 25 अंकाः |
| पठितावबोधनम् | - | 30 अंकाः |

2. समस्ताः प्रश्नाः अनिवार्याः सन्ति |
3. प्रश्नसंख्या प्रश्नपत्रानुसाम् अवश्यमेव लेखनीया |
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन एव लेखनीयानि |

## 'क ' खण्डः

## अपठितावबोधनम् (10 अङ्काः)

**प्रश्न-1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** **10**

भारते उत्सवाः द्विविधाः सन्ति– राष्ट्रीयाः उत्सवाः अन्ये च पारम्परिकाः उत्सवाः । १९४७ तमे वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के अस्माकं देशः स्वतन्त्रः जातः । समग्रे देशे अयम् उत्सवः आयोज्यते । एवमेव १९५० तमे वर्षे जनवरीमासस्य षड्विंशतितिथौ गणतन्त्र दिवस समारोहः भवति । एतौ अस्माकं राष्ट्रीयौ उत्सवौ । पारम्परिक-उत्सवेषु एकः विशिष्टः उत्सवःसंस्कृत दिवस अस्ति | अस्य श्रावणपूर्णिमाम् वर्तते । एतत् दिनं भारतस्य केन्द्रशासनेन संस्कृतदिनत्वेन घोषितम् अस्ति। अस्मिन् दिने अस्माभिः संस्कृतकार्यक्रमेषु भागः ग्रहीतव्यः। विदुषां मेलनं, संस्कृत नाटकानां मञ्चनम्, परिचर्चा, श्लोकोच्चारणम्, संवादाः ,प्रदर्शनी, इत्यादयः बहवः कार्यक्रमाः आयोजयितुं शक्यन्ते । संस्कृतम् अस्माकं देशस्य गौरवम् इति अस्माभिः सर्वदा स्मरणीयम् । संस्कृते एव अस्माकं संस्कृतिः आश्रिता । अतएव उच्यते-भारतस्य प्रतिष्ठे द्वे- संस्कृतं संस्कृतिस्तथा ।

**I. एकपदेन उत्तरत – ( केवलं प्रश्नद्वयम्)** (1×2= 2)

(क) गणतन्त्र दिवस – समारोहः कदा समायोज्यते ?

(ख) किं दिनं 'संस्कृतदिवसः' इति घोषिता ?

(ग) अगस्तमासस्य पञ्चदशदिनाङ्के कः स्वतन्त्रः जातः?

**II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम्)** (2X2=4)

(क) अस्माकं गौरवम् किं अस्ति?

(ख) अस्मिन् दिने के-के कार्यक्रमाः आयोजयितुं शक्यन्ते?

(ग) अस्मिन् दिने अस्माभिः कुत्र भागः ग्रहीतव्यः?

**III. भाषिककार्यम् – ( केवलं प्रश्नत्रयम्)** (1×3 =3)

(1) 'सम्पूर्णे' इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

(अ) समस्ते (ब) समग्रे (स) देशे (द) स्थाने

(2) 'मूर्खाणाम्' इत्यस्य किं विपर्ययपदम् अत्र प्रयुक्तम् ?

(अ) विदुषाम् (ब) ज्ञानीनाम् (स) छात्राणाम् (द) अध्येतृणाम्

(3) "गणतन्त्र - दिवसः समारोह: भवति " इत्यत्र क्रियापदं किम् ?

(अ) दिवसः (ब) गणतन्त्रः (स) समारोहः (द) भवति

(4) "समग्रे देशे उत्सव: आयोज्यते" इत्यत्र विशेष्यपदं किम् ?

(अ) समग्रे (ब) उत्सव: (स) देशे (द) आयोज्यते

**(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत** (1X1=1)

## 'ख' खण्डः

## रचनात्मक कार्यम् (15 अङ्का:)

**प्रश्न-2. शैक्षिक भ्रमणस्य वर्णनं कुर्वन् मित्रं प्रति लिखितं पत्रम् मञ्जूषायां प्रदत्तैः पदैः पूरयत - (मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए पदों से भरिए।) (1/2x10 =5)**

प्रिय (i)…………………भास्कर।

सस्नेह नमस्ते।

(ii) ………………………अहं मित्रैः सह शैक्षिकभ्रमणाय 'दार्जिलिङ्ग इति' पर्वतीयस्थलं गतवान्। (iii) ………………….. स्थानस्य सौन्दर्यम् अद्भुतम् (iv)………………. अस्ति। विशालै: (v)……………… सुसज्जिता इयं देवभूमिः एव अस्ति । एवं प्रतीयते यत् (vi)…………………. अन्यस्मिन् एव संसारे वसामः। इमं सुरम्यं प्रदेशं दृष्ट्वा इदम् असत्यम् एव प्रतीयते यत् पर्वताः केवलं दूरतः एव (vii) ……………………… पर्वताः तु सदैव रम्याः एव भवन्ति। अहं त्वया सह अपि एकवारं तत्र पुनः (viii) …………………. इच्छामि । आशासे आवां शीघ्रं गमिष्यावः। अधुना विरमामि। सर्वेभ्यः मम (ix)……………………. कथनीयः।

(x)………………… मित्रम्,

शैलेन्द्रः


**मञ्जूषा –**

| |
|---|
| गन्तुम्, वृक्षैः, नमस्कारः, मित्र, भवतः, अस्य, एव, वयं, रम्याः, गतसप्ताहे। |

**प्रश्न-3 चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत- 1X5=5**

**मञ्जूषा-**

| |
|---|
| रामलीला, मञ्चोपरि, दर्शकाः, रामः, लक्ष्मणः, सीता, रामभक्तः, हनुमान्, प्रसन्नाः, जनाः, अभिनयं, चरणयोः, प्रणमति, भवनानि, सुसज्जितः, ध्यानेन |



**अथवा**

**मञ्जूषातः पदानि चित्वा 'पर्यावरणम्'इति विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत।**
**(1X5=5)**

**मञ्जूषा** –

| |
|---|
| वृक्षारोपणम्, जीवनस्य, प्लास्टिक-स्यूताः, उद्योगेभ्यः, विषाक्तजलं, अवकरं, नद्यां, आधारः, धूमं, प्रदूषितं, मोटरयानम्, सर्वे नागरिकाः, नगरेषु, जागरुकाः। |

**प्रश्न-4. अधोलिखिताम् कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत – (½x10=5)**

एकस्मिन् वने एकः विशालः ……………आसीत् I तस्मिन् बहवः खगाः वसन्ति स्म। एकदा ते अतीव ………… आसन्। अतः भोजनं ……………….इतस्ततः भ्रमन्ति स्म। ते दूरं दूरं गच्छन्ति स्म। अन्ते च एकस्मिन् क्षेत्रे…………… अपश्यन्। ते तत्र गत्वा प्रसन्नतया तंडुलान् खादन्ति स्म । परन्तु …………….बदधाः अभवन्। अधुना किम्……….इति चिन्तयित्वा ते सर्वे जालेन सह एवं एकं…………..उपागच्छन्। तेषां मित्रं एकं……………..आसीत्। सः जालं…………….. अकर्तयत् | अन्ते सर्वे स्वतंत्राः भूत्वा अनृत्यन् अगायन् च सुखं तु ……………..एव विद्यते।

**<u>मञ्जूषा</u>**

| |
|---|
| जालेन, करणीयं, दंतैः, वृक्षः, खादितुम्, एकतायाम्, स्वमित्रं, तंडुलान्, मूषकः, बुभुक्षिताः। |

**अथवा**

**मञ्जूषायाः उपयुक्तपदानि गृहीत्वा गुरुशिष्ययोः मध्ये क्रीडायाः विषये संवादं पूरयत।**

**राजीवः-** सोम। पश्य एतत् ..................।

**शोभाः-** 'अतीव सुन्दरम्' इति।एतत् तु ................... चित्रं प्रतीयते।

**राजीवः-** आम्, ............................ स्थिताः एताः अजन्तागुहाः एव।

**सौरभः-** अहो दृष्टम्। अत्र तु अनेकानि जातकचित्राणि .................. सन्ति।

**देविकाः-** जातकं किं भवति ?

**राजीवः-** अहं न जानामि, आचार्यं ................|

(तत्र गत्वा)

**छात्राः-** गुरुवर! ................ किं भवति।

